
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल.क्र M-2658 विषय वेद

नाव वैदिक यज्ञ विमर्श

लेखक/लिपीकार -

पृष्ठ. 128 काळ - पुर्ण/ अपुर्ण

अनंतकृतं रामपद्धतिं याज्ञिकप्रियाम्॥ अंचयष्टिंपयनाभिंसंप्रदायास्य
पद्धतिम्॥७॥ अथानेतांस्तुसंगृह्य निजबुध्याविमृश्य च॥ ततोपियाज्ञि
कानां च संप्रदायो यथाऽधुना॥ तथा कर्कानुसारेण ज्योतिष्टोमकृतो
र्जुः॥ प्रयोगसारनामासौ प्रयोगोऽरच्यते यतः॥८॥ सूत्रवाक्यसमुल्लि
ख्यप्रयोगलेखनं नहि॥ कृतं पूर्वैरतस्तस्य लेखनं क्रियते मया॥१०॥ दर्श
पूर्णमासाभ्यामिष्ट्वाऽन्येन यजेतेति श्रुतेः। वसंतेऽग्निष्टोमः। स्वकाले
कृताधानस्य यजमानस्य दर्शपूर्णमासपूर्वकं वसंतकाले सोमयागो भवति।
सोमेन वोपक्लृप्तसोम आधानस्य सोमप्राधान्यान्नाविशेषात्॥ सोम

यागार्थं संभृतसंभारस्य यजमानस्य तु सोमसन्निध्यौत्स्वकालात्ऽदूरेणाऽन्नाह
रेणवा देशकालादिसंकीर्त्य मम सपत्नीकस्यात्मसंस्कार पूर्वक नि
त्य नैमित्तिक काम्य कर्मानुष्ठानार्थं सोमेन यक्ष्यमाणः श्रौतोग्नीन्नह
माधास्ये इति संकल्प्य सोमाधानास्य यथोक्तमिष्टं तं पूर्णाहुत्यं तं
वाऽग्न्याधानं कृत्वा सोमाधिकारासिध्यर्थोऽधिकार प्रवृत्तिविनाऽग्निहो
त्रहोमादि कर्मान्तराऽव्यवधानेनैव संतु कालाऽनादूरेणैव चाव्यव
हितः सोमयागोभवति ॥ वसंते ब्राह्मणोग्निमादधीतेति यदहरेवै
नं श्रद्धोपनमेत्तदहरादधीतेति ॥ सोमेन यक्ष्यमाण आदधानोनंतु

एवेन्ननक्षत्रमितिचश्रवणात्॥संभवाश्चेत्सोमकालादरोवा॥इदमे
वाऽधानंसर्वकर्मार्थं॥पुनराधानप्रसक्तौसोमप्रवृत्तिर्नास्त्येवेत्यन्यत्रक्ष स २
ण्णम्॥सोमाधानेकृतेपिसोमयागानंतरमन्येषांयागानांदर्शपूर्णमा
सपूर्वकत्वमेवानुष्ठानन्नतुदर्शपूर्णमासयागयोःकरणंवेनेतरयज
तेरनुष्ठानकरणेऽधिकारइतिकर्कदेवौ अनियमएवेतिश्रीअनंतयाज्ञि
काः॥क्षत्रियवैश्ययोःसर्वदादर्शपूर्णमासपूर्वकत्वमेवाधानंभवति॥
तथाचोक्तं॥विप्रेसोमेष्टिपूर्वत्वंविकल्पंप्राहजैमिनिः॥राजादेरिष्टि
पूर्वत्वपक्षमेवनियच्छतीतिश्रीधरदीक्षिताः॥द्विपुरुषाऽसोमपीथि

नःसोमाधानं नभवतीति महादेवदीक्षिताः॥ अविशेषश्रवणाद्भवती
तिदेवाधायो याज्ञिकाश्च॥ संप्रदायपद्धतिकारास्तु सोमाधानं चेद्द्विपु
रुषसोमपीथिनो ज्योतिष्टोमप्रारंभ एवाऽधानमूचुः॥ ऐन्द्राग्नं पुनरुत्स्य
ष्टमालभ्य द्विपुरुषाऽसोमपीथिनः॥ पुनरुत्सृष्टो गौरिति वक्ष्यमाण
लिंगाद्गोपशुम्॥ तत्र पितृपितामहेन चोभाभ्यां सोमयागे कृते दो ब्रा
ह्मण्य [illegible] भावादैन्द्राग्नोऽधिकारपशुर्न भवति॥ उभा
भ्यामन्यतरेणापि सोमपाने कृते तु दौर्ब्राह्मण्यपरिहारार्थमधिका
रपशुर्भवत्यवेति कर्काऽनंतदेवयाज्ञिकाः॥ पितृपितामहयोर्मध्ये

अ

न्यतरेणाऽकृतेपिसोमयागेऽधिकारपशुर्न भवतीति कठशाखायां श्रीअनंतयाज्ञिकाव्याख्यातवंतः॥तथाचभंडनमिश्राः॥नसोमंपीतवा न्यस्यपितावापिपितामहः॥दुर्ब्राह्मणंतमाचष्टेकर्कः शास्त्रांतरश्रुतेः॥ पितापितामहोवापिसोमंयस्यनपीतवान्॥ऐंद्राग्नंपुनरुत्सृष्टमालभे तपशुंहिसः॥एवंमीमांसकाः प्राहुर्याज्ञिकाअपिकेचन॥तस्यनेष्टः पशुः कैश्चित्पितायस्यतुसोमपः॥पितर्यसोमपीथेपिसोमपश्चेत्पिता महः॥तत्रैंद्राग्नोनकर्तव्योभारद्वाजीयभाष्यतः॥चोदकानुग्रहाच्चायं पशुश्चाग्नोऽवगम्यते॥पुनरुत्सृष्टयान्योहिवाहोत्सृष्टः पुनर्वहन्॥वाग्ने

पिसंभवत्येतद्दृहस्येषहिमाचले॥ वाच्यस्तस्याविशिष्टत्वाच्चोदकाल्लोकगर्ह
णात्॥ कलौयुगेलुगोयागनिषेधाच्चभवेदजः॥ पुनरुक्तस्पष्टशब्दार्थश्च्छाग
एवभवेदिह॥ स्वकंठेनभरद्वाजः सुस्पष्टमिदमब्रवीदिति॥ सचसोमा
रंभास्सर्वस्मिन्नपिपुण्याहेऽमावास्यायांपौर्णमास्यांवा सोमारंभदि
नेवाऽग्नीषोमीयविकारेणोद्धरणादिकर्मापवर्गान्तिः पश्वगेवभवति॥
सोमाधानेतुसोमारंभदिनएवाधानसमनंतरंलेष्वेवाऽग्निष्वग्न्यन्वा
धानादिकर्मापवर्गान्तोभवति॥ वक्ष्यमाणसोमांगभूलसमारोपंयावदा
धानसिद्धाग्नीनांधारणस्यविद्यमानत्वात्॥ केचिदत्रार्थेसोमसमाप्त

नंतरमग्नीनांधारणमिच्छंति॥तदयुक्तमित्युपपादितंदेवभाष्ये॥देशकाला
दिसंकीर्त्यममदौर्ब्राह्मण्यपरिहारार्थंकरिष्यमाणस्यदेंद्राग्नपशोरंगभूत
मित्यादिनासंकल्पपूर्वंद्विवेदीश्रीअनंतदेवकृतरुद्रकल्पद्रुमोक्तप्रकारेण
मातृपूजादिस्मार्त्तनांमंगकर्मणामनुष्ठानंविधायदेशकालाद्यनुकीर्त्य
ममदौर्ब्राह्मण्यपरिहारार्थमन्वाहार्यदक्षिणेनपुनरुत्सृष्टेनैंद्राग्नेनपशु
नाऽहंयक्ष्यइतिसंकल्प्यायथोक्तोधिकारपशुःकर्त्तव्यः॥पुनरुत्सृष्ट
गुणरहितहिमवद्देशीयच्छागपशोरलाभेतुस्वयंकतिचिद्दिनानिपा
लयित्वापुनरुत्सृष्टःकार्यइतिकेचित्॥अन्येत्वनादिष्टप्रायश्चित्तंकृत्वा

यथालब्धेनाऽपुनरुत्सृष्टेनापि प्वागेन यागः कर्त्तव्य इत्याहुः॥ याज्ञिका
सुप्रायश्चित्तं नेच्छंति॥ उक्तालाभे संकल्पवाक्ये पुनरुत्सृष्टेनेति न वक्तव्य
म्॥ पुनरुत्सृष्टप्रयोगो दीपिकाकारेण रामवाजपेयिना उक्तो यथा॥ अ
स्य पशोर्मीमांसायां संस्कारकत्वनिर्द्धारणासात् पूजापूर्वमाभ्युदयिकका
र्यं॥ अयं च गृह्ये कार्यः सोमानंगत्वात्॥ अग्नीषोमीयस्य च सोमप्रसंगेन
बहिर्यागदर्शनादन्यपशूनां गृह एव यागः॥ अग्न्यन्वाधानादि ब्राह्मण
तर्प्पणांते विशेषः॥ षड्ढोताराहुतेरभावो निरूढपशवत्तस्याः पाठात्॥
अस्य चाग्नीषोमीयविकारत्वात्॥ अतस्त्र व्रतोपायनादि पश्वंगतया न

भवतिपुरोडाशांगतयाऽग्रे वक्ष्यमाणत्वात्॥ खादिरो यूपः॥ तदभावे बैल्वो
रौहीतको वा॥ स च पंचारत्नीप्रभृति पंचदशपर्यंतो दशसप्तचतुर्दश
वर्जं॥ निरूढ एव च्यरत्निश्चतुररत्निरित्यादिनान्यत्र॥ अत एव पश्वं
गव्रतोपायनप्रणीताप्रणयनाज्यभागपूर्णपात्रविष्णुक्रमाणामभावः॥
द्विःप्रोक्षितइध्मः॥ एकवत्स्तरणं॥ न शेतानुमुहूर्तंप्रैषः॥ पुरोडाशांगं
व्रतोपायनंप्रणीताप्रणयनं यजप्रैषावाज्यभागौपूर्णपात्रं विष्णुक्रमाः
कर्मापवर्गाश्च भवंति॥ क्लोमप्लीहादिभागावदानानां नियमः॥ व्रतोपा
यनप्रणीतेत्यादि पाशुकसूत्रभाष्ये निर्णीतत्वात्॥ उपाकरणमंथन

योऽग्निर्यमः ॥ अन्वाहार्यो दक्षिणा ॥ त्रीणि समिष्टयजूंषि ॥ अंते श्रूला
वभृथः ॥ अन्यन्निरूढवत् ॥ अत्र त्रीणि समिष्टयजूंषीत्युक्तं तच्चिंत्यम् ॥
यतः प्राजापत्ये ष्टकापशोरस्योत्तरग्रंथविरोधात् ॥ तस्मात्पुरोडाशांगमेकं समिष्ट
यजुरेवेति पुनरुत्सृष्टस्य प्रयोगः ॥ ॥ अग्नीषोमीयपशुना सवनीयेन वाप्ययं ॥
पशुः समानतंत्रः स्यादिति बौधायनाशय इति ॥ भास्करमिश्रैरुक्तत्वादग्नीषोमी
येन पशुना सवनीयेन वा समानतंत्रो वाऽधिकारपशुर्भवेत् ॥ अस्मिन्पक्षे प्रधा
नसंकल्पे विशेषो यथा ॥ देशकालादिसंकीर्त्य मम दौर्ब्राह्मण्यपरिहारार्थं पुनरु
त्सृष्टैंद्राग्नपशोरग्नीषोमीयेन पशुना सहालंभं कुर्वन् हिरण्यशतगवदक्षिणे

नवासोश्वदक्षिणेनमंथौदनतिलमाषदक्षिणेनचरथंतरपृष्ठेनत्रिवृद्द्वारिच
तुष्टोमेनाग्निष्टोमसंस्थेनज्योतिष्टोमेनाऽहंयक्ष्यइति ॥ यद्यपिकर्काचार्यमतेमं
थौदनादीनांपुरुषसंस्कारायत्वप्रार्थत्वेनैवदानंतथापिमंथ्यादीनां
लौकिकाग्निसिद्धानांप्रसक्तरूपाणांत्वप्तिपर्याप्तानांदानकालेदा
नस्यसंप्रदायाऽदर्शनाच्छतपथब्राह्मणभाष्यकारैर्हरिस्वामिभिःक्र
त्वर्थत्वेनैवनिर्णीतत्वाद्देवयाज्ञिकैश्चविकल्पनोक्त्वाच्चतथाप्रयो
गोलिखितः ॥ तत्प्तिपर्याप्तानांलौकिकाग्निसिद्धानांप्रसक्तरूपा
णांपुरुषार्थत्वेनैवदानपक्षेत्वत्रमंथौदनतिलमाषदक्षिणेनदक्षि

णाकाले च मंथ्योदनतिलमाषांश्च दक्षिणा इत्यनयोर्वाक्ययोः संकल्प
वाक्ये नोल्लेखः ॥ अस्मिन्पक्षे दक्षिणादानोत्तरं मंथ्योदनतिलमाषाश्चे
त्येतावद्वाक्यमुच्चार्य लौकिकाग्निसिद्धानां प्रत्यक्षरूपाणां तृप्तिप
र्याप्तानामेव दानं न तु यत्किंचित्तत्स्वरूपमात्रेण निष्क्रयरूपेण वेति
विशेषः ॥ अग्नीषोमीयपशोरुपाकरणप्रभृत्यधिकारपशोः संस्का
रतंत्रस्य प्रवृत्तिः ॥ यद्यप्यग्नीषोमीयउपाकरणमंथनयोर्विकल्प
स्तथापि करणपक्षः श्रेयान् । श्रुतौ विहितत्वादिति शिष्टाः ॥ तत्र
पूर्वमग्नीषोमीयस्योपाकरणं कृत्वा पश्चात्तेनैव तत्क्षणे नैंद्राग्नस्य क

२ प्रय माणशास्त्रा त्समानतंत्रप्रयोगपक्षे। ग्नीषोमीयेपशौ विशेषः। पात्रासा २
दनेद्यवेवंवपा २

र्त्तव्यमित्सेवंप्रोक्षणसमंजनवपाः। गयागादिषुपूर्वंपूर्वमग्नीषोमीय
स्योत्तरमुत्तरमैंद्राग्नस्येत्सेवमनुक्तेष्वग्रेसर्वत्रज्ञेयं॥ तत्रएकादशि
निधर्माः पशुगणेष्विति वैश्वपण्यो॥ एकमेकमूलं॥ एकैवोरखा। शा
खोप्येकएव॥ एकमेवोपाकरणंतृणं॥ द्विगुणरशने द्वे॥ द्वौछागौ
पशू। एकैववपाश्रपणी॥ हिरण्यशकलानिदश। पशुपुरोडाशेत्रयो
विंशतिकपालानि। पुरोडाशपात्रीद्वयं चेति। पात्राणामुपकल्प
नानंतरंस्तोकयार्थंविपाश्रपण्योःमूलशासोरखानांपन्चानामधि
कारपश्वर्थंपृथग्वोपकल्पनं॥ एतेषांप्रोक्षणाद्यभावः॥ अस्मिन्न

कौ. ७

प्र॰ सो॰

॥८॥

पिपक्षे एकस्मिन्नेव शामित्रभूसंस्कारः शामित्रो लुकस्त्वेक एव॥
तस्मादेव शामित्रांतरे पृथक् श्रपणार्थं नयनं॥ उभौ शामित्राग्नीस
मस्याहवनीये तंत्रेण प्रतिपक्षे पइति विशेषः॥ एकत्वणेनोपाकृ
त्येसाद्य पृष्टमेउपावीरसीति तृणमादाय॥ उपावीरसि॥ तेनाग्नी
षोमीयं पशुमुपस्पृशस्यपदेवानिति॥ उपदे॰ वसूनि॥ तेनैवतृ
णेनैंद्राग्नं पशुमुपस्पृशस्यपदेवानिति॥ उपदे॰ वसूनि॥ ततो
ऽग्निमंथनादि होमांतं सकृदेव॥ अंतराशृंगबंधनं यूपे बंधनं
चैकस्य कृत्वाऽपरस्य करणं। यूप एव द्वयोर्नियोगः॥ नियोगेऽ

ग्नीषोमाभ्यां जुष्टं नियुनज्मि ॥ इन्द्राग्निभ्यां जुष्टं नियुनज्मि ॥ प्रोक्ष
णे। अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि। इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि ॥
प्रोक्षणाद्यधस्तादुपोक्षणांतं सशेषमेकस्य कृत्वा तामिरेव सकृत्सं
स्कृताभिः प्रोक्षणीभिरपरस्य प्रोक्षणाद्यधस्तादुपोक्षणेन प्रोक्ष
णीभिः शेषकरणांतं ॥ समंजनमेकस्य कृत्वाऽपरस्य करणं। लला
टोपस्पर्शनं च। उदङ्नयने पार्श्वतो युगपन्नयनं। प्राकृताभ्यां वपाश्र
पणीभ्यां द्वयोरन्वारंभः। वेदितृणं च तुष्टयादानं। सकृदेवोपप्रे
ष्यप्रैषः। सकृदेव शामित्रोल्मुकानेयः। एक एव शामित्रस्थानं॥

३ पाक्षिके

पश्चात्तृणं द्रुपप्रास्तनमुदकांस्थं प्राकांस्थं वा। संज्ञपयान्वगमन्ताभि
स्यूहितस्त्रंत्रेणप्रैषः॥ द्वयोरपि वाश्यमाने सकृदेवप्रायश्चित्तं। सकृ
देवपक्षेपरिपशव्याहुती। संज्ञप्तोपशूद् स्यूहितस्त्रंत्रणप्रैषः। प्राकृता
भ्यांवपाश्रपणीभ्यामाहिर्भूतम्माप्रदाकुरितितंत्रेणनियोजनीद्रुप
प्रासनं। पूर्वपत्नीकर्तृकंप्रत्येकप्रोक्षणं। ततोऽध्वर्युयजमानकर्तृकं
पश्वासशोनिषेकात्प्रत्येकं। प्राणशोधनादिपश्चान्निषेकांतंप्रत्येक
मितिवापाठः। उत्तानकरणादितृणमूलांजनांतमेकस्यकृत्वाऽप
रस्यकरणं। उत्करेऽनूहितेनतृणमूलद्वयापासनंयजमानाभिष्ठा

नं च तंत्रेण। वपोत्स्वेदनादि परिवासनांतमेकस्य कृत्वाऽपरस्य करणं॥ तयोरेव वपाश्रपण्योः प्रदेशांतरे द्वितीयवपयाप्रोर्णवनं। सौकर्यपक्षे ऽन्ययोर्वा॥ आहवनीयेऽनूहितेन त्वष्टा गृह्णप्रास्तनं तंत्रेण। अग्निराज्यस्येति प्राकृतश्रृताभिघारः पृथक् पृथक्। सकृदेव स्तोकानुवाचनप्रैषः। श्रृतयोः श्रृते प्रचरे स्यूहितस्तंत्रेण प्रैषः। अग्नीषोमौ गच्छ। इंद्राग्नी गच्छेति क्रमेण वपयोः प्राणदानं॥ प्रियाभ्यां धामभ्यां प्रियई सद आसीदतामित्यूहितेन तंत्रेण वपयोरासादनं॥ प्रत्येकमालंभः। वपायागे॥ अग्नीषोमाभ्यां इंद्राग्निभ्यां छागस्य वपायै मेदसोनुब्रूहि। इंद्राग्निभ्यां छा

[?]छागस्य वपायै मेदसोनुब्रूहि। अग्नीषोमाभ्यां छागस्य वपां मेदः प्रेष्य॥
इदमग्नीषोमाभ्यां॥१

गस्यवपां मेदः प्रे३ष्य। इदमिंद्राग्निभ्यामिति क्रमेणवपयोर्यागः। कृत्वा
प्रोक्षितावेववपाश्रपण्यावनुप्रास्यतिसोकर्यपक्षे॥ क्रमेणोभयोः पशु
पुरोडाशयोर्निर्वापः। तत्रविलालंभेमुसलावघाने हविष्कृदावापेचदेवश
ब्दः प्रकृतिवदूहुवचनांतः। ग्रहणे। अग्नीषोमाभ्यांजुष्टंगृह्णामि॥
इंद्राग्निभ्यांजुष्टंगृह्णामि। प्रोक्षणेत्वाविशेषः। संयवनांतेचर्चकः।
इदमग्नीषोमयोः। इदमिंद्राग्न्योः। प्राणदाने। अग्नीषोमौगच्छ। इंद्रा
ग्नीगच्छेति। पशुपुरोडाशेयजप्रैषावाज्यभागौ। पुरोडाशयागे॥
अग्नीषोमाभ्यांपुरोडाशस्यानुब्रू३हि। अग्नीषोमाभ्यांपुरोडाशंप्रे३

ष्य। इदमग्नीषोमाभ्यां। इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहि। इन्द्राग्निभ्यां
पुरोडाशं प्रेष्य। इदमिन्द्राग्निभ्यां॥ द्वितीयपुरोडाशस्य स्विष्टकृदवदान
ग्रहणोत्तरमुपरिष्टाद्द्विराभिघारः॥ स्विष्टकृद्भागश्चोभयोस्तन्त्रेणस
कृदेव॥ क्रमेण विशसनादि घ अवदानग्रहणान्तं॥ ऐन्द्राग्नस्यैव स्तवनि
ष्ठमेव। उभयोस्तन्त्रेण स्वधितिऊवध्यलोहितयोः प्रतिपत्तिः। क्रमेणैक
स्मिन्नेव प्रोक्षिते शूले हृदयो हृदययोः प्रतर्द्दनं। सौकर्यपक्षे द्वितीये प्रोक्षि
ते शूले द्वितीयस्य वा॥ एवमैन्द्राग्नस्यावदानानि वस्त्रेण बध्वैकस्यामेवो
खायां द्वयोरप्यवदानश्रपणं। सौकर्यपक्षे पृथग्वा। मार्जिते त्रिः प्रच्याव

यतात्रिः प्रच्युतस्य हृदये ऽत्तमे कुरुताद्य पश्चाद्धूनौ॰ हविः शमितारश्रि
तिश्रतमित्स्यवक्रूलानन्नस्तं भगवो नम्नस्तऽ॰ ही सूक्तिस्तं त्रेण श्रामित्र
नुशासनप्रैषः। सक्रूदेवसंवादप्रश्नः। क्रमेण हृदयाभिघारणाद्यव
दानाभिघारणं॥ पश्वकूश्रपण पक्षे पृथक् पृथक्पात्रस्य स्थोरवातो
वस्तयोः पृथक्करणं। क्रमेणोभयावदानानां प्रैणदानं॥ वपावत्सहैव
हृत्साबेधा क्रमेण सादनं। अग्नीषोमीयस्य जाघनीमसादयित्वैवेंद्रा
ग्नस्यावदानानि सादयित्वा तस्या जाघन्या सह वपावदूहितेन मं
त्रेण तंत्रेण जाघन्योरासादनं॥ प्रसकमालंभः। अंगयागो। जुह्वा

मुपभृतिवसाहोमहवन्यां प्राशित्रपात्रे इडापात्र्यां चोपस्तीर्य जुह्वामुप
भृति च हिरण्यशकलमवधाय मनोताप्रैष्यो भयत्र यथोक्तमग्नीषोमी
यस्याऽवदानानि गृहीत्वा जुह्वामेवद्धितीयं हिरण्यशकलमवधाय
प्रसुपस्तीर्य वसाग्रहणायाज्ज्वालनांतं कृत्वा प्राशित्रपात्रे इडापात्र्यां
च यथोक्तमवदायोपर्यनभिघार्य जाघनीं गुदं च निष्ठुं च निधाय प
शुसंमर्शनमकृत्वैवाऽनुवाचनप्रभृति प्रधानयागांतं कृत्वाव
सायाहुतशेषं पात्रांतरे कुर्यात् ॥ तत्र पैंद्राग्नस्यांग यागः ॥ तत्र जु
ह्वां वसाहोमहवन्यामेव चोपस्तीर्य जुह्वामेव हिरण्यशकलमवधा

॥१२॥

यमनोताप्रेष्योभयत्रयथोक्तमवदानानि गृह्णीत्वोभयत्र द्वितीयं हि
रण्यशकलमवद्यायोभयत्र प्रस्तुपस्तीर्यवसाग्रहणा दीडावदानां
तं कृत्वाप्राशित्रेडापाभ्यां च प्रकृतिवदुपरिष्टाद्दक्षिणाचार्य जाघनी
गुदं वनिष्टुं भागमवदानानि च निधाय पश्वेद्धयोपयुक्ताः वशिष्टा
नां पश्वंगानामैंद्रः प्राणमंत्रेण तंत्रेणैव संमर्शनं। अनुवचनेनाइं
द्राग्निभ्यां छागस्य हविषोनुब्रूहि। प्रैषेइंद्राग्निभ्यां छागस्य हविः प्रेर
ष्या। स्यागेइदमिंद्राग्निभ्यामिति इंद्राग्नस्यांगयागः। ऐंद्राग्नस्य प्रधा
नहोमोनंतरं सकृद्देववनस्पतियागः। उभयोस्तंत्रेण स्विष्टकृद्यागः॥

ऐंद्रः प्राणमन्त्रेण संमर्शितानामवशिष्टानामंगानां स्विष्टकृद्धागोत्तरमा
हवनीयेग्नौ तूष्णीं प्रक्षेपइति। शिष्टसर्वशाखीयया द्विकसंप्रदायस्त
त्र भाष्यलिखितश्रुत्यर्थवादमूलं॥ भर्तृयज्ञभाष्ये॥ प्रसेस्यवादिषो
व्याघारयति वृसाशेषेण वाजिनवत्॥ स्पष्टं। सर्वं जुहोति। सर्वमिति
स्विष्टकृत्साकं पशुसंबंधिप्राशित्रेडाजाघनीगुदव्यतिरिक्तानि संम
र्शितानि जुहोतीति व्याख्या मूलं वा। वसयोर्हुतशेषो समस्य सकृदेव
दिग्व्याघारणं। सकृदेव समस्येडाकरणं॥ ऐंद्राग्नस्येव यक्षो। माक्षीनौ प्र
दानं। अग्नीषोमीयस्य तु वनिष्ठोरेव प्रदानं। गुदत्रेती यांभ्यामुपयष्टोमः।

यूहने। अग्नीषोमयोरिंद्राग्न्योर्वनस्पतेरुज्जितिमिति। अग्नीषोमाविं
द्राग्नीवनस्पतिस्तमपनुदंत्विति॥ द्वाभ्यां जाघनीभ्यां पत्नीसंयाजाः।
जाघनीद्रव्यशेषादग्नीधे भागप्रदानं चेति। पुनरुत्सृष्टस्याग्नीषोमी
येन पशुना समानतंत्रप्रयोगः॥ अथ कर्त्ता सपत्नीकोऽनेकपत्नीकश्चेत्स
र्वाभिर्गुर्वादिनिश्चयसहसोमारंभात्पूर्वं ज्योतिर्विदुपदिष्टे सुमुहूर्त्ते पुण्याहे पू
र्वाह्णे पूजोपकरणानि गृहीत्वा पूर्वनिश्चितदेवयजनभूमौ गत्वा पादौ हस्तौ
च प्रक्षाल्य गोमयादिनोपलिप्ते तंडुलपिष्टादिनाकृतस्वस्तिके समे शुचौ
देशे कुशासनादौ दक्षिणदेशास्थितपत्नीसहितः प्राङ्मुख उपविश्य सप

वित्रकुशपाणिर्द्विराचम्यत्रिः प्राणानायम्यत्रिमात्रंप्रणवमुच्चार्योपवि
शान्गुर्वादीन्ब्राह्मणानिष्टदेवताश्चप्रणम्यसुमुखश्चेत्यादिश्लोकपाठे
नगणपतिंस्मृत्वाकुशायवजलकुसुमान्यादायपल्यन्चारब्धोदेशका
लादिसंकीर्त्यअग्निष्टोमयज्ञोपयोगिदिकूसाधनशालायतनादिकर्तु
निर्विघ्नतासिध्यर्थंगणपतिभूमिकूर्मानंतवराहविश्वकर्मब्राह्मणादै
वज्ञगुरूपूजनपुण्याहवाचनानिकरिष्यइतिसंकल्प्याक्षतपुंजेष्वन्यत्रो
क्तविधिनागणपत्यादीन्पूजयेत्॥ विश्वकर्मपूजालुचतुर्विंशसंगुलाः
वयवांकितेयजमानहस्तमितकाष्ठदंडेकार्या॥ ततः कलशस्थापन
पूर्वंपुण्याहवाचनंकृत्वासर्वेभ्योयथाशक्तिदक्षिणाचदत्वाशिल्पिनं

वस्त्रादिना तोषयित्वा कीलेनैकीकृते भूतलं इत्यादिना शुल्बयाज्ञिकोक्त
भूसमत्वप्रकारेण समां भूमिं कृत्वा तस्यां समे शंकुं निखाय इत्यादिना शु
ल्बोक्तरीत्या प्राक्सूत्रं साधयित्वाऽपरैं तोविमितकरणादि यज्ञशालां मा
नुषव्यापारेण पूजितकाष्ठदंडेन यथोक्तप्रमाणे कारयेत्॥ तत्र विमि
तादीनां प्रमाणं॥ विंशत्यरत्निः शाला स्यात्तदर्द्धेन तु विस्तृता॥ विमि
तं चतुरस्रं स्याद्दशारत्निप्रमाणतः॥१॥ यावत्प्रमाणा रज्जुः स्यात्ता
वानेवाऽगमो भवेत्॥ आगमार्द्धं भवेच्छंकुरंतरर्द्धं निरंच्छनेमृ॥२॥ पं
चदशमथैकविंशं त्रिकमपरं परतस्त्रिकं चापि॥ द्वादशसूत्तं मः पाश:
तो मेरज्जुप्रमाणमेतत्॥३॥ आधानेपदिकं कुर्यात्सोमे तु द्विपदो भवेत्॥

अग्नोस्तुत्रिपदोज्ञेयएतत्स्वक्रमलक्षणम् ॥४॥ नवकेलक्षणंकुर्यात्त्रि
णिकुर्यात्त्रिषुत्रिषु ॥ उत्तमोनवकः पाशस्तदस्तोमानमुच्यते ॥५॥ सदो
मध्यमरेखायांतत्रोदीचीनिशम्यया ॥ तस्याः प्रांचपदंसप्तकोलतो
धिष्ण्यानिकारयेत् ॥६॥ पृष्ठ्यादक्षिणतस्तत्रविंशत्सूर्ध्वशतांऽगु
लम् ॥ मुक्त्वांऽतरंततः शास्त्रधिष्ण्यस्थानंतुकारयेत् ॥७॥ हविर्द्धा
नाऽलयंकुर्याद्दशाऽरत्निप्रमाणतः ॥ आग्निध्रंतुतदुर्द्ध्वेनमध्येधिष्ण्य
प्रकल्पयेत् ॥८॥ तुर्येप्राग्वंश्यरेखायांमध्यतश्चतुरस्रके ॥ द्विप्रादश
२० मिलेक्षेत्रेकोणेषूपरनाविदुः ॥९॥ चात्वालादुत्करंकुर्याद्दपरेण
रथंतरं ॥ उत्करादुत्तरेकुर्याद्ब्रह्मस्यरथांतरं ॥१०॥ ऊवध्यासूर्वतः

कुर्याद्वामित्रस्य रथांतरं ॥ अथ वेदिद्वितीयखंडाद्यैरथमानं तु दर्शितं ॥
॥१॥ अंगुलैरथ संमिताया: प्रमाणं तत्राष्टाशीतिशतमीषा चतुःश
तमक्षः षडशीतिर्युगमिति ॥ अष्टादशोऽध्याये चतुःस्रक्तीमिति सू
त्रे चतुरस्राकारदर्शनाद्धिष्ण्येषु नवपादभागलोकाइतीष्टकापूर
णपरिशिष्टे प्रमाणदर्शनाच्चाऽत्राप्यष्टादशांगुलमितस्समचतु
रस्राण्येव धिष्ण्यानि चयनपरिभाषयाषडंगुलचतुरंगुलमत्सु
च्चानि वा कारयेत् ॥ प्राग्वंशोहविर्द्धानमंडपः ॥ प्राग्वंशं विमितं चो
उदग्वंशः सदः । सदोहविर्द्धानयोर्द्वारतिविस्तृते पूर्वापरद्वारे ।
पूर्वदक्षिणदिशो राग्नीध्रस्य ॥ विस्तारद्विगुणोच्छ्रितानि द्वाराण्य

न्यत्रसदसः। सर्वत्रस्थूणानां विखननं स्वपंचमांशं॥ पंचारत्निमितासम
चतुरस्रा शतपदा युगमात्री वा कर्धीःनं लभाष्याभ्यामर्थसिद्धा चतुरंगु
लोत्सैवशाखालरा ज्ञानुदघ्ना याज्ञिकसंप्रदायाद्धस्तमात्रो आवोत्तरवे
दिः॥ अर्थपरिमाणं ब्रह्मागारं मार्जालीयागारं च॥ अत्रारत्न्यादिनां प्रमा
णं लुचयनप्रयोगे परिभाषायामुपरिष्टाल्लिखिष्यामः॥ दानवाचनेसा
दिपरिभाषालिंगात्सर्वत्रांगुल्यादेर्मानं यजमानं॥ महावेद्यर्थप्रक्रम
प्रमाणं त्वध्वर्योरिवेस्य ८ मेककर्कीत्॥ विशेषस्तस्मात्पितामहबाबा
पाठकानां प्रपितामहश्रीगंगाधरपाठकचरणकृतशुल्वभाष्याद्ये
द्रष्टव्य इति संक्षेपतो। विमितादीनां प्रमाणं॥ अथ कालाः॥ दीक्षाप्रभृ

२ नस्त्रमत्सात् १२

तिशुक्लपक्षेपंचमी ० सप्तमी वा प्रस्तुतः। कालातिक्रमे नियतक्रिया
प्राप्तकालत्वात्। द्वादशदीक्षाः॥ अपरिमिता वा। पदीक्षाशब्देन दीक्षाध
र्मयुक्तान्यहान्युच्यंते॥ तेषु वक्ष्यमाणदीक्षाधर्मैर्युक्ता आसते॥ न त्वने
कदीक्षास्वरूपं सद्वृत्वस्य हंदीक्षणीयेष्टेरारब्धिः॥ पुण्याहे दीक्षाक्रयः प्रस
वहस्यादि सूत्रे॥ एका दीक्षा तिस्रो दीक्षा द्वादश दीक्षास्त्रयोदश दी
क्षाः क्लेलिप्रकृतौ चत्वारः पक्षा उक्ताः॥ सर्वेषु पक्षेषु वरणाद्युद्दन
प्रैषांतं प्रथमाहकृत्यं शुक्लपक्ष एव भवति॥ शुक्लपक्षे दीक्षेतेति नियम
श्रवणात्॥ एतेन शुक्लपक्ष एकादश्यां दीक्षा पौर्णमास्यां सुत्या नवम्यां
दीक्षा पौर्णमास्यां सुत्या पौर्णमास्यां दीक्षा अमावास्यां सुत्या शुक्लपक्ष एव

चतुर्द्दश्यां दीक्षा अमायां सुत्या इत्युक्तं भवति ॥ पक्षे ष्या पशुना सोमे
न यजेत सोमावास्या यां पौर्णमास्यां वा यजेतेति श्रुतत्वात् ॥ यद्यपि
दीक्षा प्रभृति शुक्लपक्षे पंचमी ५ सप्तमी वा प्रसुतं इति शुक्लपक्षे दी
क्षा सूत्रिता तथा पि यदहः सुत्यादि श्रुतेरेकादि दीक्षाविधे कृष्ण
पक्षेपि दीक्षा भवतीति दीपिकायां व्याजपेयिनः ॥ चतस्रो वा दीक्षा
स्तिस्र उपसदः ष्टमीप्रसुतोमावास्यां दीक्षायजनीयेष्टा पौर्णमास्यां यजनी
ये वा सुत्य महरेल ह्याविपरीतमित्यापस्तंबः ॥ उदगयने शुक्लपक्षे प्रथमा
यां दीक्षा पंचम्यां सुत्या द्वितीयायां दीक्षा षष्ठ्यां सुत्येत्येवं शुक्लपक्षस्ते मापि
यावत्सप्तमहं दीक्षा सुत्ये भवत इति शास्त्रांतरीया बोधायनीया आश्वलायनी

पाश्चग्रंथप्रकाराः॥पौर्णमास्याममावास्यायां वा दीक्षा-चतुर्थ्यांमस्त्वेतिरामां
गारः॥अन्येपि कालविशेषाग्रंथांतरेभ्योज्ञेया इति कालाः॥अथप्रयोगतंत्र
मारभ्यते॥संभृतसंभारःकृतनित्यक्रियो यजमानःपत्निहिताऽहतश्मु
कृत्वासःशोत्तरीयोन्नूतनधृतयज्ञोपवीती दक्षिणपार्श्वेबद्धशिखःशिखाभि
र्नबद्धकेशोनर्यभस्मकृतत्रिपुंड्रःसुप्रक्षालितपाणिपादोहेमरजतकुशपवि
त्रान्वितदक्षिणहस्तोवामहस्तधृतबहुकुशःस्वाचांतःसपत्नीकोऽनेकप
त्नीकश्चेत्सर्वाभिरन्वितोमातृपितृगुर्वादीन्वृद्धान्याज्ञिकांश्चयथाचारं
पादोपसंग्रहणपूर्वन्नमस्कृत्य गोमयादिनोपलिप्तेतंडुलपिष्टादिनाकृ
तस्वस्तिकेगार्हपत्यपश्चिमदेशेश्रीपर्ण्यादिप्रशस्तदारुनिर्मितेपीठेकंब

लासनादिनास्तृतेस्वासनएवदर्भानास्तीर्य्यतत्रदक्षिणदेशस्थितपत्नीसहितःप्रा
ङ्मुखउपविश्यद्विःकर्मांगमाचम्यत्रिप्राणानायम्यत्रिमात्रंप्रणवमुच्चार्येष्टदेव
ताःप्रणम्यसुमुखश्चेत्यादिश्लोकपाठेनगणपतिंस्मृत्वाकुशयवजलकुसुमान्या
दायपत्न्यन्वारब्धोदेशकालादिसंकीर्त्यकरिष्यमाणाऽग्निष्टोमसंस्थज्योतिष्टोमक
र्मांगलयामालपूजावसोर्द्धाराऽयुष्यजपाऽभ्युदयिकश्राद्धपुण्याहवाचनानिक
रिष्ये॥तत्रादौज्योतिष्टोमकर्मणोनिर्विघ्नफलसिद्ध्येगणपतिपूजांकरिष्यइति
संकल्प्ययथोक्तगणपतिपूजापुण्याहवाचनांतंकुर्यादितिप्रथमप्रयोगे॥द्विती
यादिप्रयोगेतुविघ्नेशपूजनमात्रमेव॥ततःप्रधानसंकल्पः॥कुशयवजलकुसु
मान्यादायपत्न्यन्वारब्धोदेशकालादिसमनुकीर्त्यहिरण्यशतगवदक्षिणेनवा

प्र॰ सो॰

॥१८॥

९१

सोश्वदक्षिणेन मंथौदनतिलमाषदक्षिणेन च रथंतरपृष्ठेन लिङ्गदादि चतुष्टोमेना ऽग्निष्टोमसंस्थेन ज्योतिष्टोमेनाऽहं यक्ष्य इति ॥ ततउद्धान्नप्रत्ययात्षड्भिर्मंत्रैर्मंत्रोच्चा रमात्रेण देवार्त्विग्वरणम् ॥ अग्निर्मेहोता ॥ आदित्योमेऽध्वर्युः चं[illegible]द्रमा मे ब्रह्मा पर्जन्यो मउद्गाता ॥ आपोमेहोत्राशंसिनः रश्मयो मे चमसाध्वर्यवः ॥ सएता न्देवर्त्वि जो वृत्वाथैतान्मानुषान्वृणीते । तत्र ऋक्सामवेदिनामपेक्षितत्वाद्यावदृत्वि जां सर्वकर्मणामुपद्रष्टृत्वकरणे समर्थस्यैव विद्वद्द्विजस्य सोमप्रवाकत्वेनाभि धस्य पूर्ववरणं ॥ प्रधानसंकल्पात्प्रागेवेत्यपरे ॥ मोत्रशर्मन्नस्मिंज्योति ष्टोमेऽग्निष्टोमे सोमे त्वं सोमप्रवाकोभव ॥ भवामीति प्रतिवचनं ॥ ततः सो मप्रवाकं मधुपर्कवस्त्रकुंडलमुद्रिकादिभिरर्चयेत् ॥ सोमप्रवाकश्चाऽऽदः

॥१८॥

शर्मणः सोमेन भविष्यति तत्र भवता होत्रं कर्त्तव्यमित्यादि होत्रुद्गातृ शास्त्रोक्तं करोति॥केचिद्वरणं नेच्छंति॥अन्ये तु वृत्ते यजमानपुरुषमेव सोमप्रवाकमन्यंते॥षोडशर्त्विजो ब्रह्मोद्गातृ होत्रध्वर्यु ब्राह्मणाच्छंसिप्रस्तोतृमैत्रावरुण प्रतिप्रस्थातृ पोतृ प्रतिहर्त्रच्छावाकनेष्ट्रग्नीत्सुब्रह्मण्य ग्रावस्तुदुन्नेतृन्वृते॥ चतुरो वा द्वौ तु रूपाद्इतरे यथावेदं॥ब्राह्मणाच्छंस्यग्नीत्पोतारो ब्रह्मणः॥सर्वान्प्राङ्मुखानुपवेश्य स्वयमुदङ्मुखः॥सव्यहस्ते स्थं गृहीत्वा साक्षतेन दक्षिणहस्ताग्रेण ब्रह्मणो दक्षिणं जानु आलभ्य गोत्रशर्मन् हिरण्यशतगवदक्षिणेन वासोश्वदक्षिणेन मंथोदनु तिलमाषदक्षिणेन चरखतरप्टेन च विवदादि चतुष्टोमेनाग्निष्टोमसंस्थेन ज्योतिष्टोमेनाऽहं यक्ष्ये॥तेत्रे

मे त्वं ब्रह्मा भव। भवामि इति प्रतिवचनं॥ अथ वा गोत्रशर्मन् अस्मिं ज्योति
ष्टोमे ऽग्निष्टोमे सोमे त्वं ब्रह्मा भव। भवामीति प्रतिवचनमित्येवं मुद्गात्रादीनां
त त्वस्य मुद्गाता भव। त्वं होता भव। त्वमध्वर्युर्भव। त्वं ब्राह्मणाछंसी भव॥ त्वं प्र
स्तोता भव। त्वं मैत्रावरुणो भव। त्वं प्रतिप्रस्थाता भव। त्वं पोता भव। त्वं प्रतिह
र्ता भव। त्वमछावाको भव॥ त्वं नेष्टा भव। त्वमग्नीद्भव। त्वं सुब्रह्मण्यो भव।
त्वं ग्रावस्तुद्भव। त्वमुन्नेता भव॥ भवामीत्येवमुद्गात्रादीनां सर्वेषां प्रति
वचनं॥ तत ऋत्विग्वरणकस्य स्वप्रयोगशास्त्रानुसारेण मधुपर्कः सर्वेषां॥
वस्त्रकुंडलमुद्रिकादिभिः पूजनं च॥ तंत्रेण वैकैक वेदगणस्य बहुवचनां
तेन मधुपर्कः॥ तेऽस्माकं यजुषामित्यंप्रयोगः॥ साधु भवंत आसनाम र्चयि

वरण २

आ १

ष्यामो भवतः॥ विष्टरा विष्टरा विष्टराः॥ पाद्यानि पाद्यानि पाद्यानि। अर्घो अर्घो
अर्घाः। आचमनीयान्याचमनीयान्याचमनीयानि। मधुपर्को मधुपर्को म
धुपर्काः। प्रतिगृह्यतामिति यजमानः। अस्मदोह्योश्चेति शाखाल प्रतिग
ह्णीम इति लूह्णी प्रतिगृह पदार्थेषु ऋत्विजः प्रतिब्रूयुरिति विशेषः॥ यजमा
नाय सोमसमर्पणं॥ तिलकादि मांगल्यकरणं। आशीर्वादाः॥ एतावत्कृ है
त्वा ऋत्विग्भिः सह देवयजननिर्धारणार्थं देवयजनभूमौ गत्वो ज्ञात्
प्रसयाद्यजमानो देव ऋत्विग्भ्यो मानुषेभ्यश्च देवयजनं प्रार्थयते॥ अग्निर्मे
होता स मे देवयजनं ददात्विति रूपां श्रुत्वा होतर्देवयजनं मे देही सुच्यै
ब्रूयात्॥ एवं सर्वत्र ज्ञेयं॥ आदित्यामेध्वर्युः स मे देवयजनं ददातु॥ अध्व

प्र॰ सो

॥२०॥

र्यै देवयजनं मे देहि। चंद्रमा मे ब्रह्मास मे देवयजनं ददातु। ब्रह्मन्देवयज
नं मे देहि। पर्जन्यो म उद्गाता स मे देवयजनं ददातु॥ उद्गातर्देवयजनं मे
देहि॥ अपो मे होत्राशंसिनस्ते मे देवयजनं ददतु॥ होत्राशंसिनो देवयजनं
मे दत्त॥ रश्मयो मे चमसाध्वर्यवस्ते मे देवयजनं ददतु॥ चमसाध्वर्यवो दे
वयजनं मे दत्त॥ दत्तमिति होत्रादीनां सर्वेषां प्रतिवचनं॥ देवयजन
जोषयंते॥ उच्चलम ६.स.न मविभ्र ६.शि॥ अभितो देवयजनमात्रदेशं पु
रस्तादूर्जं। प्राक्स्रणवमुदग्वा॥ प्रत्क्रि चान्त्चा नर्त्विजः। उद्धतोषधिमूलेप
रैतं तेविमितं कुर्वंति। प्राग्व ६. शी। पुरस्तादुच्चा। प्रतिदिग्द्वारां। उदग्वर्जं वा। शा
लां वा। अन्यैतरपक्षेणमानकरणं॥ स्थूणानिखननादिकं हस्तास्पर्शनेन

॥२०॥

मानुषं च। परिवृत्ते चोत्तरापरे। पंचारत्नीमिले चतुरस्रे पूर्वदिग्द्वारे कृ
त्वा गृहं प्रत्यागच्छंति॥ यज्ञकर्माणि सर्वत्र कर्मणामादौ सकृद्देवों का
रोच्चारणी पद्धति दर्शपूर्णमासपद्धति टीकायां वैद्यनाथमिश्राः॥ कर्मणा
मादौ प्रति मंत्रादौ चेति कात्यायनसर्वानुक्रमसूत्रव्याख्यायां देवयाज्ञि
काः॥ कर्मणामादौ नियमः प्रतिमंत्रादौ विकल्प याज्ञिकाः। छंदर्षि
दैवतस्मरणं तथविज्ञाये तानियोधीत इत्यादि कात्यायनसूत्रान्तयें च
स्मरे[illegible] ऋषिं छंदः श्राद्धे वैतानिके मख इति परिशिष्टश्चयैकस्मिन्कांड
तत्रैव याज्ञिकाः शाखांतरीयाश्च न कुर्वंति कृत्वाऽकृतं। च मनन्ये लोऽसमा
रोह्याग्नी। गार्हपत्य एवाग्निः समारोपोध्वर्योः। ॐ ३ मा। अयंते योनि० व

ईयारयिमा सकृमंत्रेणाद्विस्तूष्णीं। सोमाधाने तु त्रयाणां समारोपः। सभ्या
वसथ्यौ समारोपेणनेयौ॥ देवयजनसमीपे चेत्तत्र स्थितौ वा॥ गलः श्री
यस्याधानोत्तरं यज्ञकर्मणि सर्वत्र विहितेषु समारोपेषु समारोपाऽभा
व एव॥ प्रत्यक्षा एवाग्नयो नेया इति कर्कादयः सर्वे। ततउदवसानं। दे
वयजनं प्राप्य पाणिपादे प्रक्षाल्याऽचम्य यजमानोऽरणी हस्ते कृत्वा
सोमं चादाय पूर्वद्वारेण सपत्नीकः शालायां प्रविशति। शालास्तंभे
पूर्वार्द्ध्ये गृहीत्वाऽरणिपाणि रोहेदमगन्मेति। यजमान एव द्वयोर्हस्त
योरंतराऽरणी गृहीत्वा शालायाः पूर्वद्वारशाखासंबंधिनं दक्षिणं स्त
तं स्थूणाराजमुत्तरस्तंभापेक्षया पृथुतरपरिणाहं पूर्वार्द्ध्यो ख्यस्तंभं

द्वाभ्यां पाण्यग्राभ्यां दक्षिणहस्ताग्रेण वोदङ्मुख एव स्पृष्ट्वा मंत्रं पठति॥
एदमगं॰ मदेम॥ अत्रेदानीतनानां याज्ञिकानां संप्रदाये शालायां वक्ष्य
माणसोमासंदीप्रवेशनादौ द्वारमध्याऽवरोधनमप्यस्या द्वारदक्षिणस्तंभा
लंभनं॥ श्रीअनंतभाष्य देवभाष्य तत्पद्धति राम वाजपेयी दीपिकाचेति
प्राचीनग्रंथैश्च लुप्तपविरुद्धं॥ स्वसूत्रानुरूपशाखांतरीयाऽपस्तं
बसूत्रविरुद्धं च॥ तथा च तत्सूत्रं॥ प्राग्वंशस्य मध्यमं स्थूणाराजमाल
भ्य जपतीति वाजसनेयकमिति। पूर्वार्ध्यास्तंभास्तुरस्तादित्यत्र वक्ष्य
माणकार्ये द्वारमध्यलक्षणाया एव प्रयोजनस्योक्तत्वाद्द्वारशाखयोरंत
राले द्वारमध्ये पूर्वार्ध्यास्थूणाराजस्तंभालरस्य निखातस्यैवाऽलंभ

नेकृत्यातदानीमेवतस्योत्सर्गकरणं॥ युक्तरूपमितिप्राच्यामाशायः
शालायां॥ राज्ञानेनिदध्यासाहृतश्चेत्॥ उच्चासनेपीठादावेवनभूमौ॥
प्राक्प्रयादन्नमुपहरत्यस्मेहविष्यममा॥ सं॥ लौकिकाग्निसिद्धंघृतसंस्कृ
तंक्षीरशर्करान्यां वा॥ सोमंगंधादिनापूजयित्वा अन्नोपहरणमात्रैव
करोतियजमानएव॥ इदमन्नोसोमायराज्ञेनमम॥ गार्हपत्यखरेपंच
भूसंस्काराः॥ मंथनं॥ स्थापनं॥ अग्निंविहृत्य॥ आहवनीयदक्षिणा
ग्न्योःखरेभूसंस्कारान्कृत्वाद्वावग्नीविहरेत्॥ सप्तसुपृक्तमेषर्द्धव्यामे
चसाग्निचित्य॥ अपराह्नो॥ अतीतं॥ उपपन्नंवा॥ पत्न्यश्चसर्वा अपि॥ अ
शनंपूर्वाह्णएव॥ कृत्यर्थमपादिश्यान्यस्मै॥ कृत्यर्थंमिगोपाययथाका

नवार

लं संपादय। अन्यः प्रत्याह॥ गोपायामि संपादयामि॥ एता वत्यौ वीहि कं कर्मांऽ

न्तरे परिव्रत उदकुंभ वस्त्र प्स्तु दीक्षा। अपराह्णे। ब्रह्म त्समतः। वाग्यतः

कर्मणि वर्तमाने॥ दक्षिणतो ब्रह्मा सम ंत्र मासने संस्कृत्य समंत्र मास्ते॥

समंत्रं लूह्मी वोपवेशने कर्तव्ये यथोपवेशन मासने संस्कारोऽन्ये सर्वत्राऽ

नुक्ते पु ज्ञेयः। यत्र यत्र लूह्मी मंत्र वद्या ब्रह्मण उपवेशनं तत्र तत्राऽसनं नि

धानं त्वध्वर्यो रेव॥ परिव्रते उदकुंभस्थापनं। नापित उपतिष्ठति॥ नखनि

कृंतनकं कृतोदपात्रं कुशातरुणं हृ पक्ष्मौदुंबर दंत धावन का ष्ठ दीक्षा वा

सस्तामुपकल्पनं। नखानि निकृंतत्यंगुष्ठप्रभृतीनि दक्षिणहस्तस्य

प्रथमं। उदङ्मुखः। ततः सव्यहस्तस्य। एवं दक्षिण वाम पादयोः॥ दक्षिणं

गोदानविताऽर्थ। उनतीमा आपइति॥ इमा आपः शमु मेसंतुदेवीः॥ यूपवत्कु
शतरूणं। ॐ ष धेत्रा यस्व। क्षुरेणचाभिनिधाय। तूस्ती। स्वधितेमैनं हिं
सीः। छित्वा। उदपात्रेप्रास्यति। एवमुत्तरं तूस्ती। नापिताक्षुरं प्रयछति। ते
नकेशश्मश्रुवपति। वपनोत्तरं क्षौरनिमित्तं लौकिकाद्भिः स्नानं॥ आ
चमनं॥ ततओदुंबरकाष्ठेनद्वादशांगुलेनलोहितमनभिगमयंदं
तान्धाव। मुखं शुद्धिराचमनं॥ ततः स्थापितोदकुंभोदकेनआ
पोऽस्मानितिस्नात्वा॥ ॐ आपो अस्मान्मा॰ प्रवहंतिदेवीः॥ आचमनं।
उदिदाभ्यइत्यकामस्युत्तरपूर्वार्द्धं॥ उदिदाभ्यः शुचिरापूतएमि। क्षौ
मंवस्तेध्यैनिष्टयै न्त्रूमादहतं। वेदाद्भिरभ्युक्ष्य॥ स्नातवस्त्रं वासोत्रधो

तेविचितकेशंप्रस्तारिन्नदशंदीक्षातपसोरिति॥दीक्षातपसोस्त्व
र्णपुव्यन्।नन्नीविकुरुते।पशसामाघावाप्ष्थिवीयशसेन्द्रावृहस्प
ती॥यशोभगश्चमाविदद्यशोमाप्रतिपद्यतां।मिति स्मार्त्तमंत्रेणद्वि
तीयमुत्तरीयंचपरिधत्ते।द्विराचमनं॥एवंप्रलिप्रच्छालताःपरस्मि
न्नरिचतेपत्नीतूष्णीं।वपनवा।तन्नोदकुंभनरवनिकृंतनोदुंबरका
ष्ठदीक्षावासस्तामुपकल्पनं॥नखनिकृंतनंदक्षिणोत्तरहस्तयोः।
तथापादयोश्च।ततःपाणिपादप्रक्षाल्याचम्योदुंबरकाष्ठेनदंतान्धावे
त।मुखशुद्धिराचमनं॥ततःउदकुंभोदकनस्नात्वाआचमनं।उत्तरपूर
र्वाद्धिउक्रोमणं।वाससीपरिधायद्विराचमनं।प्रपाद्य।वाकुग्रहेलमङ्ग

प्र॰ सं॰

इति संतिष्ठते ऽवभृदीक्षा॥३॥

ज्ञान पूर्वद्वारेण शालायां प्रवेशयति। प्रतिप्रस्थाता ऽपरद्वारेण पत्नीं चैवं। तौ च स्वस्वस्थाने उपविशतः॥१ पत्न्यश्च ज्येष्ठादिक्रमेण कांडानुसमयेन सर्वासामवभृदीक्षा॥ अथ दीक्षणीयेष्टिः॥ आग्नावैष्णवमेकादशकपालः। आदित्येभ्यो वा चरुः। प्राकृतमिष्टयजुषः करोति॥ समिष्टयजुर्वर्ज्यं वा। दीक्षणीयायां ब्रह्मवरणव्रतजपदक्षिणा वेद्यालंभसमिष्टयजुषामभावो वा। च स्पतिप्रैषस्तु भवत्येव। अग्न्यन्वाधाने दीक्षणीयायामेव। उपांशु चरंति प्रागग्नीषोमीयात्। वाग्यंतेन वा दीक्षणीयो नीचैस्तरां नीचैस्तरामितरे। उपांशूपसदः॥ दीक्षणीयाप्रायणीययोऽतिथ्येष्टीनां प्रधानदेवताशब्दस्योपांशुत्वं सर्वत्र भवति। महावीरसंभरणं

प्रवर्ग्यचरणंप्रवर्ग्योत्सादनमग्नीषोमीयपशुश्चकठसूत्रादुक्तैरेव भवति॥
अग्न्यन्वाधाने। उपांशु। अग्नाविष्णू उच्चैः। एकादशकपालेन पुरोडाशेन। च
रुपक्षे। उपांशु। आदित्यान् उच्चैः। चरुणा। सप्तदशोवज्रः। यवैर्यागः।
पक्षेव्रीहिभिर्वा। सचरुयवपक्षे यवव्रीहिभिर्यागः॥ मम्माग्नेपक्षः। उत्तमे
कालेव्रतोपायनं। येवैकल्पिकपक्षार्था अस्मिन्नेतिभिः करिष्यमाणाभया
चलेसर्वेयथाकालंयथासंभवमवधारिताः॥ अग्न्यन्वाधानं। षडासनं। वा
चस्पतिप्रैषोयजमानस्य। वाचस्पतेयज्ञंगोपाय। ब्रह्माप्रत्याह। गोपाया
मि। दक्षिणतोब्रह्मयजमानयोरासने पश्चाद्यजमानवेदिस्पृकु॥ ब्रह्मय
जमानयोः स्वस्वासने उपवेशनं पौर्णमासवत्॥ प्रणीताप्रणयेनं। त्रया

णांपरिस्तरणं। पात्रासादनं। भूर्पाग्निहोत्रहवणि। स्फ्यः कपालान्ये
कादश। शम्या कृष्णाजिनं। उलूखलेमुसलं। पात्री पवित्रछेदनानि।
पवित्रे उपवेषश्च। आज्यस्थाल्युपसर्जनी पात्रे च। कुशमुष्टिर्वेदि
स्पां च। अग्निर्योक्त्रं च। स्रुवो जुहूश्च। उपभृद्ध्रुवा च। सन्नहनावे
धादनानि परिधयश्च। विघस्यावाज्ये च। पुरोडाशपात्री होतृषद
ने चाश्वतावदानमोषधं च। प्राशित्रहरणे अंतर्धानकटश्च। पूर्णपा
त्रं। पश्चेकर्मापवर्गसमिन्धः। इध्माबर्हिषो रूपकल्पनं। षडवत्तं च।
चरुपक्षे स्थाली मेक्षणयोश्च। स्फ्योपहितपात्रीकरणादि बिल्वालं
भे देवयोरित्यूह्या। चरुपक्षेऽन्नूहः। ग्रहणे। उपांशु। अग्नाविष्णुभ्यां।

उच्चैः। जुष्टं गृह्णामि। चरुपक्षेउपांशु। अदित्येभ्यः। उच्चैः॥ जुष्टं गृह्णामि।
प्रोक्षणे लाविशेषः। नानाबीजेस्य चरुयवमयपुरोडाशपक्षेलुईक्षणं
भेदेन। अपद्रव्यनिरसनतंत्रेण। अभिमर्शनंचेद्भेदेन। आलंभनंभेदे
न। प्रोक्षाभिमर्शनंभेदेन। कृष्णाजिनादानादियवानांतुषविप्रमोकां
तंकृत्वा तुषाः स्थाप्याः। तत्र मुसलावधानेस इदंदेवाभ्यामिति कृहः। त
तोव्रीहीणामुलूखलेआवापःसमंत्रः॥ अध्वर्युयजमानयोर्वाग्विस
र्गः॥ मुसलादानंतूष्णींमेव। उलूखलेअवदानंस इदंदेवेभ्य इति। पुनर्ह
विष्कृदाह्वानाभावः॥ शूर्पादानंतूष्णींमेव। हविरुद्वपननिष्पवनावि
विवेकीकरणानि मंत्रेण॥ पूर्वस्थापितलुषैः सहतंत्रेणलुषनिरसनं।

व्रीहियवाणामसंकरेण पात्र्यामावापः। तंत्रेणाभिमंत्रणं। पृवानां फ
लीकरणकणनिधाने। ततो व्रीहीणां च। व्रीहिपक्षे कणानां तेचर्चैकः॥
उच्चैः। इदं। उपांशु। अग्नाविष्णवोः। उच्चैः। इदं। उपांशु। आदित्यानां। इष
धावापेधान्यमसिधिनुहिदेवावित्यूहः। कलोपोपधाने एकादशाक
पालान्युपधाय तदुत्तरतश्चरोः स्थानकल्पनं। यवपक्षे यवानामीक्षणं
कृत्वा भैदेन चरुतंडुलानामीक्षणं। व्रीहिपक्षे पिष्टसमीपे चरुन्निधा
य सहैव पिष्टानां तंडुलानां चेक्षणं। पात्रीं पिष्टान्यावाप्य सपवित्रचरु
स्थाल्यां तंडुलावापः। लौकिकोदकेन चरोः त्रिः प्रक्षालनं॥ पिष्टेषू
पसर्जनीनिनीयतथैव चरुपात्रे निनय[illegible]ति। आज्याधिश्रयणमा

ग्नौ घ्रस्य चर्वभावे। चरुपक्षे च सेऽस्थाने तु धौमं गारान्कृत्वा तेषु घर्मो
सीदिधिश्रपणं। चरोरवस्तावश्रपणदानं मंत्रेणोपरि। प्रसिद्धः। पेषणंय
वनं वा पक्वापश्रोपहितिः प्रथा। मार्जनाभ्यूहनज्वालातथाव्युद्धसंसा
दनमितिसर्वधिकरणमालायां दशमस्य प्रथमे एकादशाधिकरणेऽ
क्तानां चरोरभावः। अन्यत्प्राणदानांतं प्रकृतिवत्॥ प्राणदाने॥ उप
श्रु। अग्नाविष्णू। उच्चैः। ग. घस्व. विदा। चरुपक्षे उपांशु। आदित्यान्।
उच्चैः। ग घस्व. विद॥ व्रतग्रहणमंत्रे वा। अंतरेणाऽपराग्नी गत्वान
र्ध्वाऽस्य यो व्यवाये न हवींऽष्युत्तरेण-॥ ऽपरेणाहवनीयं प्राङ्मु
न्नग्निमीक्षमाणाऽपउपस्पृश्य व्रतमुपैत्यग्ने व्रतपत इति॥ अग्ने

ध्रुतप॰ नाम्। प्रस्ता गत्य शंस्या ऽ धूर्य योरंतरेणे वा गत्यस्या सने ऽ पवि
ति। अवबोध्य॰ नेसप्रद शोने ति। उत्त मम्पा जेऽदद म ग्न ये सो मा य।
उपांशु। अग्नाविष्णुभ्यां। चरुपक्षे आदित्येभ्यः। उच्चैः। देवेभ्य इत्या
दि। तत आज्यभागौ। निघणवषट्कार यो: समकाले प्रधानयागः।
प्रधनयागे। उपांशु। अग्नाविष्णुभ्यां। उच्चैः। अनुब्रूहि। आश्राव्या
ह। उपांशु। अग्नाविष्णू। उच्चैः। यज। उच्चैः। उपांशु। अग्नाविष्णुभ्यां। उ
च्चैः। नमम। चरुपक्षे। उपांशु। आदित्येभ्यः। उच्चैः। अनुब्रूहि। चरा
मेक्षणेनावदाने। आश्राव्याह। उपांशु। आदित्यान्। उच्चैः। यज। उच्चैः।
इदं। उपांशु। आदित्येभ्यः। उच्चैः। नमम॥ स्विष्टकृद्यागः। संचराम्युक्त

णं।प्राशित्रादि-चतुर्द्धाकरणवर्जं सर्वं-चरुपक्षेपि भवत्येव। व्यूहने।उ
पांशु। अग्नाविष्ण्वोः। चरुपक्षे आदित्यानां।उच्चैः।उज्जितिमिति।
उपांशु। अग्नाविष्णू। चरुपक्षे आदित्याः।उच्चैः।नमपनुद्‌तामिति।
चरुपक्षे दंत्विति। ज्येकाम्युश्रुणादिवेद यो क्‌ विमोकांतेकुर्यात्
पत्न्यश्चेत्सर्वानिरन्वीरव्योसत्से कैवज्ये छावेदमुंचति। येकं तुस्वं
स्वा।वेदस्तरणं यदिहोतानकरोति तदाप्रतिपत्तिकर्मतूष्णींमध्व
र्येरावेदैर्वेदस्तरणं। एवंप्रायणीयादिष्वपि। अध्वर्युर्यजमानं शालां
पूर्वेण।तिष्ठन्नन्यङ्ङ् कुशेषु नवनीतेन शीर्षोध्वमनुलोमं ह्सपादको
महीनांपयोसीति। महीनांपयोसिवर्चोदेहि। यजमानो। वृत्रस्येत्य

क्ष्यावनक्ति त्रैककुदांजनेनाभ्यावेन्यद्दक्षिणं त्रिरुत्तरंपश्चात्कृत्स्नमे
त्रः शारेषीकयासाग्रया। वृत्रस्यासि कनीनकश्चक्षुर्दा॰ देहि। सकृत्तू
ष्णीं। त्रिरुत्तरं। वृत्रस्यासि॰ मे देहि। द्विस्तूष्णीं। अध्वर्युः कुशपवित्रैस्त्रिस
प्तभिर्मेति पावयति सप्तभिः सप्तभिः प्रतिमंत्रमच्छिद्रेणेति सर्वत्र छिद्रपरि
नाम्पुनम्अज्यप्रदक्षिणं। चित्पतिर्म्मा पुनात्वच्छिद्रेण पवि॰ भि॥ तस्य ते पवि॰
त्रकेयमः। वाक्पतिर्म्मा पुनात्वच्छि॰ केयमः। सकृद्वर्जः। देवो मा सवि॰ के
यमः। एकेन त्रिभिः सप्तभिर्वा॥ एकशतेन वा राजसूये। आवो देवास इति
वाचयति। आवो देवास ईमहे॰ हवामहे इति ब्रूयात्। आवो देवास ई॰ हवा
महे। स्वाहा यज्ञमित्यंगुलीअचतेनानाहस्तयोः। एवं शेषं प्रतिमंत्रं॥

यजमान एव। स्वाहा यज्ञम्मनसः। आरंभे। स्वाहोरोरंतरिक्षात्। यज्ञ
मा[illegible]रंभे। स्वाहा द्यावापृथिवीभ्यां। यज्ञमारंभे। उत्तमेन मुष्टीकृत्वा।
स्वाहा वातादारंभे। यज्ञं। स्वाहेत्युक्त्वा वाग्यतः। अंगुष्ठौ तत्सहिते चो
स्रजति। वाग्यतं प्रवेशाय स्याहवनीय गार्हपत्यावंतरेण। बाहुगृहीतं।
सोस्य संचर आप्रसवात्॥ वाग्विसर्गो यजमानस्य। अत्राऽन्वच्च मं
त्रोऽव्याहारयोर्मध्ये यदवसानमात्रायालेखनं तत्तयोस्तं ध्यभाव
ज्ञापनार्थमलूच्चारणकालेऽवसानं तत्र। संध्यभावस्तती येकर्का
त्रा एवं प्रतिप्रस्थाता पत्नीमभ्यंजनादि तूष्णीं। पूर्वद्वार एव करोति।

पत्न्यश्चोत्सर्वासां कांडानुसमयेनाभ्यंजनादि। अपरेण वा प्रवेश
यति। शास्य नर्यावे वांतरेण न द्वारेण। औद्ग्रभणानि जुहोति स्वात्याः
स्रुवेण। कूत्या इति प्रतिमंत्रं। आकूत्यै प्रयुजेग्नये स्वाहा। इदमाकू
त्यै प्रयुजे ग्नये। ३ मेधायै मनसेग्नये स्वाहा। इदं मेधायै मनसेग्न
ये। ततीये जपस्येच। दीक्षायै तपसेग्नये स्वाहा। सरस्वत्यै पूष्णेग्न
ये स्वाहा। इदं सरस्वत्यै पूष्णे ग्नये। आपा देवी बृहती वि॰ विश्वे मह्य
स्वा। इदमद्यो द्यावापृथिवीभ्यामंतरिक्षाय बृहस्पतये च। पंच
मं जुकौ ध्रौव मासिच्य। द्विश्च स्वात्याः स्रुवेण। ततीय ७ स्यैव

मभिपूरयति। विश्वोदेवस्येति। विश्वोदेवस्य नेतुः पुष्यसे स्वाहा। दृदंस
वित्रे। एतामेव वा पूर्णां जुहुयात्। अवयन एव। अंकुभणहोमांते बर्हि
र्होमादि भागप्राशनांतस्य दीक्षणीयाशेषस्य समाप्तिः॥ व्रतविसे
र्गोत्र भवत्येव। दीक्षितत्वधर्मनिष्ठव्रतेनैवोत्तरत्र प्रायणीया
दिषु सत्यवदननियमोऽवगंतव्यः। ते समिदाधाने यावत्॥ ब्राह्मण
तर्प्पणप्रेषतर्प्पणकर्मापवर्गास्तु न भवंत्येव वाऽनपवृत्तत्वा
दितिकर्तोऽविरोधि समिष्टयजुर्मंत्रवर्जपक्षेऽष्टमेऽग्न्यन्वा
धानव्रतोपायनेत्यादि सूत्रे व्याख्यायां च श्रीअनंतादिलिसंति
ते समिष्टयजुर्ब्राह्मणतर्प्पणप्रेषतर्प्पणकर्मापवर्गाश्चेति पद

र्थं चतुष्पथवर्जिता दीक्षणीयेष्टिः ॥ अथ कृष्णाजिनदीक्षा ॥
अध्वर्युराह यजमानं दक्षिणेन कृष्णाजिने मा ऽऽसस्व हितेदपूलानि
तर्पस्तु पश्चादासं जनवतीनिद [illegible] धाति । एकं चेत्पश्चात्सा दक्षि
णं । यजमानो दक्षिणं जान्वाच्यास्ते पश्चादेनयोः ॥ ऋक्सा
मसंधिमालभत ऋक्सामयोरिति । ऋक्सामयोः शि॰ पत्न्यो
दपः । दक्षिणजानुनारोहति शर्मासीति । शर्मासि शर्म मे॰ मा
माहिं॰ सीः । तेनास्ते परे तौ अध्वर्युर्मेखलां बध्नीते वेणि त्रिवृ
त॰ शाणमुंजमिश्रामंतरां ससऊर्गसीति । ऊर्गस्यांगिरस्यू
र्णम्रदा ऊर्जं मयि धेहि ॥ मेखलासप्रहस्तदीर्घा इति केचित् ।

यजमानकटिप्रदेशे त्रिवारं परिवेष्टनपर्याप्ता एवेस्य परे। बंधनं नूपनयनस्कौ सेंरवत्। यजमानो नीविं कुरुते सोमस्य नीविरि ति। सोमस्य नीविरसि। शिरः प्रोर्णुते विष्णोः शर्मेति। यजमान उष्णीषेण प्रदक्षिणं॥ विष्णोः शर्मासि शर्म यजमानस्य। अ ध्वर्युः कृष्णाणां त्रिबलिं पंचबलिं वो नानां दशायां बध्नीते। तया कंडूयनं। यजमान उपस्पर्शयेन या दक्षिणस्या भ्रुव उप रींद्रस्य योनिरिति। इन्द्रस्य योनिरसि। भूमौ चोल्लिखति सुसस्या इति। प्राची। सुसस्याः कृषीस्कृधि। अध्वर्युमुख संमितमौदुंब

विषा ५

रं दंडं प्रयच्छति। उदगग्रं। उच्छ्रयस्वेत्येनमुच्छ्रयति। यजमानः। उच्छ्रयस्वा वन॰ यज्ञस्योदृचः। तं दक्षिणत उपधत्ते। कार्यावसरएवयने दानी। अत्र वा मुष्टिकरणवाग्यमने। एवं प्रतिप्रस्थाता पत्नीं तूष्णीं युगपन्मेखलादि। योक्त्रेण वा। तूष्णीमेव। मेखलायाभावेदे वयोक्त्रेण तु विकल्पतः। पत्नीसंनहनं च सयोक्त्रो या इति सूत्रात् स योक्त्र प्रक्षेप्राय णीयाप्रभृत्युदयनीयेष्टेः प्राक् सर्वत्र पात्रासादने योक्त्रस्यासादन प्रोक्षणी प्रैषे पत्नीं सन्नह्येति प्रैष वाक्य पत्नी सन्नहनानामभावः। जालं वा शिरसि त्रिपर्यायं॥ जालं तु नियमे

नस्यात्सर्पीयस्त्रेकवाभवेत्। पृथुमुखोपज्ञीयपक्षोर्ध्वे शंकुः कंडूयने।
उल्लेखनात्कोलि मेखलादिचेत्॥ कृष्णाजिनादिचेद्दंडो लं। पत्न्यश्च
सर्वास्तां दीक्षाकांडानुसमयेन। अन्योदीक्षितोयंब्राह्मण इत्याहत्रि
रुच्चैः। प्रतिप्रस्थाता पूर्वद्वारउपविश्य त्रिरुच्चैः प्राह। दीक्षितोयंब्रा
ह्मणः। दीक्षितोयंब्राह्मणः। दीक्षितोयंब्राह्मणः। ब्राह्मण इत्ये
व वैश्यराजन्ययोरपि श्रुतेः॥ अथमुद्वादनाख्यप्रैषः। आस्तम
याद्वाचं यच्छति। यजमानोऽत ऊर्ध्वं। पत्नी चाऽवब्ध्योप्येवं। यदि
दैवान्मानुषाद्वा उद्वादनप्रैषस्य कालातिक्रमस्तदा विश्वकर्मणे स्वा
हेति कालाकुलिवाचनपूर्वमाध्यर्यं प्रायश्चित्तं कृत्वा वाग्यमवि

सर्गप्रैषाद्यग्निमंकर्मकुर्यात्॥ कर्मणांस्वकालातिक्रमे सर्वत्रैव
मेवयथाकालंयथायथंप्रायश्चित्तंवेदितव्यम्। अतऊर्ध्वंस्नातादि
नित्यकर्मणांलोपः सपत्नीकस्ययजमानस्य। असोमयाजिनोदीक्षि
तोयमित्येतस्मात्प्रैषात्प्राक्सूर्यास्तमयेजाते अग्निहोत्रहोमकाल
आगते यजमानः स्वयमेवश्रौते तस्मिन्नवाग्नौ स्मार्ते च सायंहोम
मात्रंकुर्यान्नप्रातर्होमं सोमयाजिनेत श्रौतेहोमाऽभावएव॥ स्मार्ते
होमस्तुसायंकालिनोभवत्येव॥ एकदीक्षापक्षे दीक्षितोयमितिप्रैषा
नंतरंप्रागस्तमयाद्यदिकालः संभवतितदादौ यूपच्छेदनंततोम
हावीरसंभरणंचकार्यं। नोचेद्धविर्विसर्जनानंतरंरात्रावपि॥ तत्र

ना२

प्रवृहनेरात्रौ।उद्धरणावसेकौद्वितीयेऽहनिप्रातर्द्विवैचा।ततःप्रा
यणीयं।दीक्षाबहुत्वेयस्मिन्कस्मिन्दीक्षादिनेव्रतकरणांतेद्विये
वकार्यं।एकस्मिंदिनेएकंदिनांतरेऽपरंव्यवहितमव्यवहितं
वाऽनयोःक्रमनियमाऽभावः॥अथसप्रवर्ग्यमहावीरसंभारः॥
दीक्षासुमहावीरांत्संभरति।अंतःपास्येदक्षिणतःसमंत्रंब्रह्मास्ते।
ब्रह्मणःसव्यपार्श्वेयजमानःसर्वत्र।अंतःपास्यदेशेसंभारान्नि
दधाति।प्राकृतस्थान्।मृदं।वल्मीकवपां।वराहविहतं।पूतीकान्।
लचूनिमदूनिकुशाल्लणानिपूतीकास्थानेगृह्णंते।अजापयः।ग

गवेधुकाः। कृष्णाजिनमभ्रिं चोत्तरतः। देवस्य त्वेत्यभ्रिमादायौदुंब
रीं चैककतीं वारत्निमात्रीं। देवस्य त्वा सं० हस्ताभ्यां। आददे नारिरसि।
सव्ये कृत्वा दक्षिणेनालभ्य जपति युंजत इति। युंजते मन० परि ष्टुतिः।
मृदमादत्ते पिंडं यद्देवी द्यावापृथिवी इति। पाणिभ्यां दक्षिणतः सा
भ्रिः। देवी द्यावापृ० पृथिव्याः। मखाय त्वा० शीर्ष्णे। आददे। कृष्णाजि
ने निदधात्युत्तरतः। वल्मीकवपाप्रभृतीनामपि पिंडवदादानोत्त
रमत्रैव निधानं प्राक्संस्थं। देव्यो वम्र्य इति वल्मीकवपां। देव्यो वम्र्यो
भू० पृथिव्याः। मखाय त्वा० शीर्ष्णे। आददे। इयत्यग्र इति वराहविहतं।

व२

इयत्यग्र आसी॰ पृथिव्याः। मखाय त्वा॰ शीर्ष्णे। आददे। इन्द्रस्यौ
जोऽसीति पूतीकान्। इंद्रस्यौजस्थ म॰ पृथिव्याः। मखाय त्वा॰ शी
र्ष्णे। आददे। मखायेति पयः। मखाय॰ शीर्ष्णे। आददे। तूष्णीं गवेधु
काः। दक्षिणकरेणैव। संभृताननभिमृशति मखायेति। युगपदेव।
मखाय त्वा॰ शीर्ष्णे। अभिमृशति। अत्र यजमानस्याप्सुदीक्षार्थं पू
र्वं कृतपरिवर्तनमध्यवगोत्रौ खननमभ्युक्षणं च संस्कारद्वयमेव कृ
त्वा तत्र सिकताद्युपकिरति। ततो तः पात्वे आगत्य कृष्णाजिनं
परिगृह्योत्तरतः परिवृतं गच्छंति प्रेतु ब्रह्मणस्पतिरिति। ब्रह्म

ध्वर्युयजमानाः सर्वे मंत्रं जपंति। प्रैतु ब्रह्मणस्प॰ यज्ञं नयन्तु
नः। परिश्रिते निदधाति संभारानुद्धतावोक्षिते सिकतोपकीर्णे
प्राग्द्वारे मखायति। रुक्माजिनस्थाने वाऽध्वर्युः मखाय॰ शी
र्ष्णे। निदधामि। दक्षिणतः स मंत्रं ब्रह्मास्ते। अजाक्षीरं गवेधु
काश्च संभारेभ्यः पृथक्कृत्वा। संभारैः सह सृजति मखायेति।
मखाय॰ शीर्ष्णे। संसृजामि। लूहंमीमृदमादाय। मखायेति
महावीरं करोति। मखाय॰ शीर्ष्णे। करोमि। प्रादेशमात्रमूर्ध्वे
मासेचनवंतं मेखलावंतं मध्यसंगृहीतमूर्ध्वं मेखलायास्यंगु

तं। निक्षिप्तमभिमृशति मखस्य शिर इति। एतावता मंत्रेण। मख
स्य शिरोसि। नात्राध्याहारः॥ आदानमेके। एवमितरौ प्रति मंत्रं॥
मृदादानादि निक्षिप्ताभिमर्शनांतं द्वौ महावीरौ करोति। तृतीय
स्याभिमर्शने मंत्रविशेषः। मखस्य शिरोसि। मखाय त्वा शीर्ष्णे। अ
भिमृशति। स्फ्यपुष्करादूलीपिन्वने। द्वे पात्रेऽनयोस्तूष्णीं करण
मभिमर्शनं च। मृदमुपशयां निदधाति। मालारूपाभिर्गवेधु
काभिः श्लक्ष्णयति मखाय त्वेति प्रति मंत्रं। मखाय त्वा शीर्ष्णे। श्ल
क्ष्णयाभिशातनं तूष्णीं पिन्वने रौहिणकपाले च श्लक्ष्णयति॥

उखावदग्निः। दक्षिणाग्नेरेकदेशमुल्मुकमादाय पस्ता ऽश्वशकृ
द्भिः प्रदीप्तकरणं। अश्वशकृता धूपयत्यश्वस्य त्वेति प्रति मंत्रं॥
अश्वस्य त्वा • पृथिव्याः। मखाय • शीर्ष्णे। ३। नात्राध्याहारः। तू
ष्णीं पिन्वने रौहिणकपाले च धूपयति। अभ्र्याश्च मंत्रे चतुरश्वे
खनति। कृष्णाजिनमपसार्य। अर्पणमास्तीर्य। यथाकृतमवद
धाति। अधोमुखान्कृत्वेतराण्यपि। अर्पणेनावच्छादयति पदार्थं च
तुष्टयं तूष्णीं कुर्यात्। प्रदहनं च मखायेति प्रतिमंत्रं। धूपनार्थाहु
तेन दक्षिणाग्निनैव। मखाय • शीर्ष्णे प्रदहामि। ३। तूष्णीं पिन्वने

तलूनेत्यादिपरिभाषालिंगात्कुंभकारादिकृतानांपक्कानांमहावीरादि
न्यनरौहिणकपालानांपात्राणांसिद्धवत्संपादनंकृत्वातेषामुपरिसं
भारैर्लेपनादिनायथोक्तसंस्काराःकर्तव्याः।उक्तंच।छिन्नेलूनेथसो
नाय्येपिष्टेरवातेचमार्त्तिके।पश्चान्मंत्राःप्रयोक्तव्यामंत्रायज्ञार्थसा
धकाइतिसंतिष्ठतेमहावीरसंभारः॥अथयूपछेदनं।दीक्षासुयूप
छेदनमित्यादिसूत्रे।आहवनीयस्यदक्षिणतस्तूष्णींब्रह्मास्ते।यूपाहु
तिंजुहोतिचतुर्गृहीतंस्रुवेणवोरुविअविति।आज्यसंस्कृत्यस
मित्पूर्वमाहवनीये।निरूप्याज्यंगार्हपत्येऽधिश्रित्यस्रुक्स्रुवंचसं

रौहिणकपाले च प्रदहति। पक्वनुद्धरत्यजवेत्त्येति प्रतिमंत्रं। अज
वेत्त्या उद्धपामि। साध्यवेत्त्या उद्धपामि। सुक्षित्यैत्त्या उद्धपामि। लूखंलीं
पिन्वने रौहिणकपाले चोद्धपति। दिवैव प्रदहनोद्धरणे। अर्जपय
सावसिंचति मखाये ति प्रतिमंत्रं। मखाय· श्रीहीं। अवसिंचामि। ३।।
लूखंली पिन्वने रौहिणकपाले चाऽवसिंचति। लूखंली पिन्वनादि
नां करणाभिमर्शनश्लक्ष्णनधूपनप्रदहनोद्धरणावसेचना
नीति सूत्रात्।। महावीरादीनामसंचरे निधानं महता यत्नेन रक्ष
णं च कार्यं भेदे प्रायश्चित्तस्य बहुत्वात्। अथ वैतावत्करणाऽस्तेभयेसा

मज्योद्वास्योत्पूयाऽवेक्ष्यगृहीते स्याज्यसंस्कारकरणे पूर्णाहुतिधर्मः। यत्र
यत्राज्यं संस्कृत्येति लेखनं तत्र तत्रैष धर्मः प्रवर्त्तते। उरु विष्णो वि-तिर
स्वाहा। इदं विष्णवे। आज्यशेषमादाय सतक्षा गच्छति यूपं। स्रुक् स्रुवाव
प्यादत्ते। अभिमृशत्यन्यानिति प्राक्छिन्नमभिमंत्रयते वा पालाशं ब
कुलपर्णमशुष्काग्रमूर्ध्वसकलशाखं मध्याग्रोपनतमव्रणमभावे
खदिरबिल्वरोहीतकाः खदिराभावे सोमइतरान्॥ अत्यन्याँ२ अगान्ना
न्याँ२ उपा-जुषं त्वा मह्यं स्रुवेणोपस्पृशति विष्णवे त्वेति। परितश्छेदनप्र
देशो। विष्णवे त्वा। उपस्पृशामि। ओषध इति कुशान्तरुणं तिरस्कृत्य। अ

वधेत्रायस्व। स्वधितइति परशुना प्रहरति। स्वधितेमैनं हिं॰ सीः। प्रथ
मशकलं निदधाति। यूपावटे प्रक्षेपार्थमन्यान्यपि शेषशकलानि भु
क्तामंत्रिसंस्कारार्थं च संगुप्ते। अनक्षस्तंभं वृश्चस्येकजं। द्यां मा लेखीरि
ति पलं तमभिमंत्रयते न दक्षिणापतेदयं हि त्वेति शोधनमभिमंत्रण
शेषो वा विशेषोपदेशात्। द्यां मा लेखीरंतरिक्षं मा हिंसीः पृथिव्या संभ
व। अयं हि त्वा। सौभगाय। दक्षिणतस्तूष्णीं ब्रह्मास्ते। अतस्त्वमित्याव्र
श्चने जुहोति यूपे वा तत्संस्कारान्स्थाणौ श्रुतेश्च। आज्यशेषादाज्यानि
चास्थिद्रुह्णीतं स्थाणावेव जुहोति। स्रुवेण यूपाहुतिकरणेत्यत्र स्रुवसं

मार्गः। अतस्त्वं देव वन· विवय·· रुहेम स्वाहा॥ इदं वनस्पतये। पंचारत्नी
प्रभृतीनां वक्ष्यमाणानां मध्ये न्यतरपक्षेण मानकरणं॥ परिवास्यां
च्छेदनं पुनः। त्र्यरत्निश्च चतुररत्निर्वैकारत्नीप्रभृतीनेके। निरूढप
वा। अष्टाश्रिं करोत्यपरवर्जं। यूपं पंचमाशमितं॥ मूलात्तक्ष्णोत्कृति
प्रादेशमात्रस्वरूनिष्पादनं। अग्राच्चषालं पृथुमात्रमष्टाश्रिम
ध्यसंगृहीतमूर्ध्वमग्रप्रतिमुंचति द्व्यंगुलं त्र्यंगुलं वा तत्पृष्टिकां
तं यूपस्य। इदानीं निष्पादनमात्रं प्रतिमोकस्तं जनो नरं स्यकाल
एवसमंत्रं। पंचारत्निः पंचदशपर्यंतः सोमे दशासप्त·च्चलदशावर्जं

मपरिमितो वा। सप्तदश वाजपेये। एकविंशतिरश्वमेधे। यथाकाम्यः
यष्टव्य इति वा। ततो यूपादीनां यत्नेन निधानमिति। संतिष्ठते यूपच्छेद
नम्। अस्तमिते दीक्षित वाचं विसृजस्व पत्नि वाचं विसृजस्वेति
त्रिराह। अध्वर्युः। दीक्षित वाचं विसृजस्व। दीक्षित वाचं विसृजस्व।
दीक्षित वाचं विसृजस्व। पत्नि वाचं विसृजस्व। पत्नि वाचं विसृज
स्व। पत्नि वाचं विसृजस्व। अनेकपत्नीके पत्नीशब्दस्य नोहः॥
एवं सर्वत्र॥ यजमानस्याग्निमभ्यावृत्य व्रतं कृणुतेति वाग्वि
सर्जनात्रिरुक्त्वाग्निर्ब्रह्मेति च सकृत्। व्रतं कृणुत व्रतं कृणुत

व्रतं कृणुत। अग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः। भूर्भुवः स्वरि
ति वा। तूष्णीं वा ग्विसर्जनं पत्न्याः। अस्तऊर्ध्वमामृष्टिविसर्गाद् न
स्तमिते नुदिते च त्रिराह दीक्षित वाचं यच्छ पत्नि वाचं यच्छेति
यथोक्तं विसर्जनम्। व्रतदुघे दोहयति। यजमानकर्तृकः प्रैषः॥
गां बौधुक्ष्य। तत्क्षीरं व्रतौ भवतः। प्रथमे व्रते व्रीहियवयोरन्यतर
मावपति। उभावेके। तद्धुतमदोहे। सर्वौषधं सर्वसुरभि चैके। गा
र्हपत्ये दीक्षितस्य श्रपणं। गोदोहनपूर्वमध्वर्युः कृत्वा शालायां शि
क्यादौ सुगुप्ते निदधाति। दक्षिणाग्नौ पत्न्याः॥ गोदोहनपूर्वं प्रति

प्रस्थातोऽश्वपयित्वा तथैव पृथक्कुनिदधाति। यवाग्नू राजन्यस्य॥
सा च लौकिकाग्निसिद्धैव। आमिक्षा वैश्यस्य। सापि लौकिकाग्नि
सिद्धैव। अग्नेत्वमिस्तृस्तास्वपिस्यवः प्राङ्दक्षिणतः। आहवनीय
स्य यजमानः। अग्नेत्वई०सु० पुनस्त्वादि। पत्नी चैवं गार्हपत्यस्य द
क्षिणतस्तूष्णीमेव स्वपिति। व्रतं प्रयच्छत्यनुस्तिस्त्वनपरस्यां त्रैसायं
दोहं। अपराह्णे प्रातर्दोहं। दीक्षिताय कांस्यपात्रेण दीक्षितस्तं च
रेण्वेव। दैवीं धियमिति व्रताय योपस्पर्शनं छस्त्वासने। दैवीं धियं
मना०सु तीर्थानो अस दृशो। आचामत्युदकं। ये देवाइति व्रतपस्य

मंमये। येदेवाम॰पांसुलेभ्यः स्वाहा। आचम्य। धात्राः पीताइतिना
भिमालभते। धात्राः पीताम॰रमलाक्तताबधः। पत्नीलोहे। ता
म्रपात्रेण स्वस्थानस्थितायै पत्न्यै प्रतिप्रस्थाता व्रतं प्रयच्छति। सा
च तूष्णीं व्रतमात्रं करोति नेतरत्। आचमनं। पत्न्यश्चेद्बहुलेस्समं विभ
ज्य सर्वाभ्यः प्रयच्छति। शरीरासामर्थ्येलौक्तिरीयश्रुतिः। ततः स्थालीमि
पक्वमोदनं घृतसंस्कृतं व्रतार्थं ग्राह्यं। यजमानस्याप्येवं। पुनः स्वा
पव्यायां तूष्णीमेव यजमानः स्वपिति। मेक्षणरूपविषाणयालोष्टं
किंचिद्दादत्त इयंत इति। यजमानः। इयं ते यज्ञियातनूः। लोष्टमुत्तरीयप्रांते

वध्नाति। अपो मुंच्यामीति मे हृति। अपो मुंचामि न॰ पृथिवीं मा विशत॥
स्मृतिशुद्धो भूत्वाऽचम्य। पृथिव्यां संभवे त्यान्नेंनिदधाति। यल्लोमह्री
तं तत्रैव। पृथिव्यां संभव। पत्न्यास्तु लूनंलोशोच मात्रमेव नेतरत्॥
पत्न्यश्चे त्सर्वासामप्येवं। यदेघात दास्वात नेदंऽ क्रूष्णाजिनेनिधा
यैवमेव शौचविधिः। मूत्रमात्रोत्सर्गकारणेप्येवं॥ अथ प्रायश्चि
त्ते। त्वमग्ने रुद्रस्याहं क्रुध्या॰ व्रस्यंथा व्याहृत्या यजमानः फलाहुति
वाचनपूर्वं॥ त्वमग्ने व्रतपा॰ व्रीत्या॥ अथ मलितयाचनं॥ लब्ध
मालभ्य वाचयति रास्वेयदिति॥ हिरण्यमालभस्वेत्यादि लब्धद्रव्य

वाच्यश्चैषणापूर्वमालब्धस्य यजमानस्य वाचनं। रास्वेयसो॰ वस्व
दा इति ब्रूहि। रास्वे॰ दानाव स्वदात। अशक्येऽभिमंत्रणं। अथ पत्नी
यजमानयोरवभृथपर्यंतं नियमाः। शूद्रसंप्रवेशासंभाषाप्रस्तुत्स्था
नाभिवादनोदकावापवर्षाणि वर्ज्ययेप्रागवभृथात्। परिक्रालं वदति।
विचक्षण चनसितिवती वाचं। श्मशानासनाऽस्य प्रोसंधि वेलयोः। वे
घाः स्तुत्यासु। अप्रायश्चित्तमपराधेऽइतरेतरस्मिन्योपहवमिच्छे
रन्। सत्रे दीक्षिताउपहूयध्वमित्येवम्। उपहूतइतीतरे ब्रूयुः। पत्न्यामेक
दीक्षा। पत्न्युपह्वयस्व। उपहूत इति पत्नी। यजमानोपह्वयस्वेति पत्नी।
उपहूताः इति यजमानः। तथादेलधावननित्यस्नानाग्निहोत्रावसथ्य

होमवैश्वदेवतर्पणसंध्योपासनपचनदानादिकं किमपि यथायोग्यं न कुरुतः। दीक्षितो व्यातपादीनि कुर्यात्। प्रचर्ग्यवांश्चेदिति स्मार्तसूत्रपरिपठितधर्मा अपि भवंत्येव। दीक्षितो न जुहोति न ददाति न पचति न निसानि कर्माणि कुरुत इत्यादयोऽन्यनियमविशेषाः। श्वस्त्यां तरतो ग्राह्याः॥ इति नियमाः॥ इति ज्योतिष्टोमप्रयोगे शुक्लैकादश्यां प्रारंभदिनकृत्यं॥ द्वादश्यां प्रथमोपसद्दयः। द्वायादिने प्रातररुणोदय एव अग्निमभ्याधते विबुद्धमस्वप्स्यंत पुनर्मन इति वाचयति॥ पुनर्मनः पुनरा॰ दवयादिति ब्रूहि। पुनर्मनः पुनरा॰ दवयात्। अनुदित एव वाग्यमनप्रेषः। दीक्षितवाचं यच्छ।३। पत्निवाचं यच्छ।३। उदिते वाग्विसर्गप्रैषः।

दीक्षितवाचंविसृजस्व॥२ पत्निवाचंविसृजस्व॥२॥उदितेयथोक्तं
विसर्जनं॥ अग्निमभ्यावृत्यव्रतंकृणुतेतिवाग्विसर्जनं॥त्रिरुक्ता
ग्निर्ब्रह्मेतिच सकृत्॥ व्रतंकृणुत व्रतंकृणुत व्रतंकृणुत॥ अग्नि
र्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञियः॥त्रिस्तनंप्रथमायांदोहयति।
त्रिस्तनेगावोधुक्ष्वेतिव्रतकरणप्रैषः॥अध्वर्युप्रतिप्रस्थातारौ
दोहपूर्वं पूर्वं धूपयित्वा स्तुस्तूपे निधानंकुरुतः॥ अथाऽन
वचनेपूर्वंप्रातरितिसूत्रात्प्रथमेऽशंघ्यतापायणीयेष्टिः॥दीक्षितेप्रा
यणीयमदित्यैचरुंनिर्वपति। अथादितेरेवदेवतापदमात्रस्यसर्व

प्र०सो०

॥४२॥

ग्रोपांशुत्वं नपश्यास्तत्स्यादीनां। अग्न्यन्वाधानव्रतोपायनेत्यादि
सूत्रात्। प्राणीयादावग्न्यन्वाधानब्रह्मवरणव्रतोपव्रतग्रह
णदक्षिणावेद्यालंभसमिष्टयजुषामभावः। वाचस्पतिप्रैषस्तु
सर्वत्रभवत्येव। षजासनं। वाचस्पतिप्रैषः। ब्रह्मोपवेशनं। यज
मानस्य। प्रणीताप्रणयनं। एकस्याहवनीयस्यैवपरिस्तरणम्।
पात्रासादनं। शूर्पाग्निहोत्रहवणिस्फ्यमेकं। शम्याकृष्णाजिनं।
उलूखलमुसलं। दृषदुपलं। पात्रीपवित्रच्छेदनानि च। पवित्रे आ
ज्यस्थाली च। उपसर्जनीपात्रं। कुशमुष्टिश्च। वेदिलक्षणमग्निश्च।

॥४२॥

योक्तं स्रुक्स्रुव श्रु। जुहू रूपभ स्च। ध्रुवासन्नहनावच्छादनानि च। परि
धयो विध्रुत्यौ च। आज्यं होतृषदनं च। तंदुलाः। प्राशित्रहरणे च।
चरुस्थाली मेक्षणे ध्मा बर्हिः षडवत्त लौकिक कपालानामुपक
ल्पनं। स्फ्योपहित पात्रीकरणादि। बिलालं भेदे व्या असौ स्रुह॥
ग्रहणे। उपांशु। अदित्यै। उच्चैः। जुष्टं गृह्णामि। प्रोक्षणत्वाविशे
षः। मुसलावधाने सइदं देव्यै इत्यूहः। धर्ममात्रत्वात्कुक्कुटाहन
नेम वत्स्येव। कणानेरध्वेर्योरेवाज्य निर्वापउपसर्जन्यां श्रप
णं च। चक्षुषे त्वेतीक्षते। चक्षुषत्वा। ईक्षो। चरुस्थाल्या सपवित्रा

प्र॰ सो॰

॥४३॥

यो तंडुलान्यावपति देवस्य त्वेति। देवस्य त्वा॰ संवपामि। ततस्तरूंल्लौ
किकोदकेन त्रिः प्रक्षाल्योपसर्जनीप्रतिगरहणाति। आज्याधिश्र
यणमग्नीधः। चरुधर्मा उक्ताः। अन्यत्प्राणदानांतं प्रकृतिवत्तु।
प्राणदाने। उपांशु। अदितिं। उच्चैः। गच्छ॰। अवबाधनेपन्चदशानैति।
उत्तमे प्रयाजे। इदमग्नये सोमाय पथ्यायै स्वस्त्ये सोमाय सवित्रे।
उपांशु। अदित्यै। उच्चैः। देवेभ्य इत्यादि। तत आज्यभागौ। आज्यभा
गाविष्ट्वा ऽज्येन देवताश्चतस्रोयजति पथ्यां ७ स्वस्तिमग्निं ३ सो
म ६ सवितारं च। आहवनीय यजतयोक्ष्यायायाः। अनिधायाव

॥४३॥

दाया ऽवदाय प्रक्रवामभिघारयत्याप्यायतामिति। चतुरवत्तं ऽस
वषट्कारान्तु। पंचावत्तीनां पंच। पथ्यायै स्वस्तये नु ब्रू३हि। आश्रा
व्याह। पथ्यां स्वस्तिं यज। इदं पथ्यायै स्वस्तये। उत्तरार्द्धे होमः। अ
ग्नये नु ब्रू३हि। आश्रा व्याह। अग्निं जज। इदमग्नये। पूर्वार्द्धे होमः।
सोमायानुब्रू३हि। आश्रा व्याह। सोमं जज। इदं सोमाय। दक्षिणा
र्द्धे होमः। सवित्रे नु ब्रू३हि। आश्रा व्याह। सवितारं यज। इदं सवि
त्रे। पश्चार्द्धे होमः। ततो निधनवषट्कारयोः समकाले मध्ये प्रधा
नचरुयागः। प्रधानयागे। उपांशु। अदित्यै ऽ चैः। अनु ब्रू३हि।

आश्रौ व्याह। उपांशु। अदितिं [illegible] ऽ च्चैः। यजा। उच्चैर् इदं। उपां
शु। अदित्यै। उच्चैः। नमम। स्विष्टकृद्यागः। संचरत्यनुक्षणं। प्रा
शित्रादिसर्वं। व्यूहने। पथ्यायाः स्वस्त्यरग्नेः सोमस्य सवितुः। उपां
शु। अदितेः। उच्चैः। ऽस्विति मिति। पथ्यास्वस्तिरग्निः सोमः स
विता। उपांशु। अदितिः। उच्चैः। तमपनुदं स्विति। जुहोत्यनुक्षणा
दिधुरि निधानां तंपृ सावेद्यो स्कृ विमोकः। आवेदेः स्तरणं। ए
तावेवं ध्वंतं। शाघ्वंते उपरवदेशे प्रतिप्रस्थाता रोहिणे च र्मण्यान
डुहे सोमं निवपति। विक्रय्येनं विचिनोति कोत्सः शूद्रो वा। ब्राह्मण उपास्ते।

आप्तेणाध्वंसीसोमाद्दक्षिणतउपविशति।उदकुंभश्चपुरस्तात्॥
धाम्नाघाराण्यपिधाय।श्रौवंजुष्कांचरुर्विगृह्णाति।तूष्णींस्रुवपे
वस्रुवेणवा।वर्हिस्तृणेनहिरण्यंवध्वावदध्यात्येषानइति।एषाते
शुक्रतनूरेतद्वर्चस्तयासंभवभ्राजंगच्छ।जूरसीतिजुहोति।जूर
सिध्वतामनः मशीयस्वाहा।इदंवाचे।शुक्रमसीतिहिरण्यमुद्धृत्य।
शुक्रमसि चंद्रः वैश्वदेवमसि।येघोलग्नंनिदध्याति।सूत्रेवद्ध्वा हि
रण्यंकुरुते।ततःप्रायणीयाशेषसमाप्तिः॥चरुमेक्षणंवर्हिर्निदधा
स्यदनीयायेसलेपंचरुंप्रमृज्यमेक्षणंप्रक्षालयतिवाचरुमनुप्रहरती

तरे। चरुस्थालीप्रक्षाल्य निदधाति। बर्हिर्होमप्रणीताविमोको राक्षस
भागभागावेक्षणभागप्राशनानि। तूष्णींमेक्षणप्रासनं माहवनीये।
चरुप्रक्षालनाभावे चरुमेक्षणबर्हिषांनिधानमिति संक्षिप्तलेशं
पेताप्रायणीयेष्टिः॥ अथ सोमक्रयः॥ चतुर्गृहीतं गृहीत्वान्वार
भस्व यजमानेत्याह। आज्यसंस्कृत्य। अन्वारभस्व यजमानः॥ अ
न्येषितो यजमानोऽध्वर्युमन्वारभते पदे होमांतं। शालाद्वारापाव
रणं। अपावृतद्वारे निष्क्रामतः। सान्वारब्धौ। प्रतिप्रस्थाता चाब
द्धाहिरण्यवत्या ॐ हुतायां दक्षिणोनुगच्छत्यारूपात्। दक्षिणेनद्वा

१. सोमक्रयणीति४ स्यलक्षितायं गा प्रवीतारज्जुबद्धा बभ्रुः पिं
गला पिंगला भावे रूणा रूणा भावे रोहिण्यश्वेताक्षी।। चिदसीत्येना
मभिमंत्रयते। अध्वर्युरेव। चिदसि मना। सखा पुनरेहि। उदीचीन्नी
यमानामनुगतोवस्व्यसीति। मंत्रपाठश्चाध्वर्युप्रतिप्रस्थात्रोरे
वा। वस्व्यस्यदिति। वसुभिराचके। बद्धदान्यतीत्या। सप्तमं पर्युप
विशंति। दक्षिणतस्तु स्त्री ब्रह्मा तत्पश्चाद्यजमानः। तयोरपरे
ण पत्नी। पश्चादध्वर्युः। उत्तरतः प्रतिप्रस्थाता नेष्टा च। हिरण्यम
स्मिन्निधायाभिजुहोत्यदित्यास्त्वेति। ॐ अदित्यास्त्वामूः घृतव

स्वाहा। इडमाप्याय। एकेन पदं त्रिः परिलिखत्यस्मे रमस्वेति। अ
स्मे रमस्व। दिस्तृष्णीं। लेखोपर्युपूर्वेण। तमुद्धृत्य। हिरण्यं। अभ्या
खननं। पदं स्थाल्यामावपत्यस्मे ते बंधुरिति। अस्मे ते बंधुः।
अपस्थाने निषिच्य। यजमानाय पदं प्रयच्छति त्वे रायः इति। त्वे
रायः। संतु मेरायः इति यजमानः प्रतिगृह्णाति। मे रायः। संतु
मा वयं परिमित्यध्वर्युरात्मानं स्पृशति। मा वयं रायस्पोषे
ण वियोष्म। अप उपस्पृश्य हृत्वा पत्न्यै पदं प्रयच्छति। १ तन्मे श्रेदि
तस्राभिरन्वारब्धो याप्रयाने ष्टालोलेड स्पैनोवान्यति। तोतो

रायइतिब्रूह्रि।तोतोरायः।सर्वासांवाचनंब्रूतंब्रूतेस्यूह्योयथायथं।
परप्रश्नानपूर्वंवापत्यश्रोह्वाचनंपृथक्।सोमक्रयण्याचसमीक्ष
माणाॅं॰समस्वइति।नैष्वैववाचयति।समरव्येदे॰दृविसंदृशीति
ब्रूह्रि।समरव्येदव्या॰देविसंदृशि।पदसुगुप्तदेशेसंरक्षति।प्रक्षा
ल्यपाणीहिरण्यंबध्वातेनाभिक्रामो।आप्यायनाभिषवा॰॰श्यदा
श्च। पुनर्हौतृर्भक्षनिः शेषासेकौ। एवमितरौ प्रतिमंत्रमैलुवसुर्वि
दद्वसुरैलुवसुः संयद्वसुरिति। मैत्रावरुणं प्रतिगृह्णाति। ऐलुवसु
र्विदद्वसुः। होतरूपव्हयस्व। होतृवद्भक्षणं। चक्षुषोर्छोकपिचाभक्षणं।
सशेषासेको होतृचमसे। होतुर्भक्षनिः शेषासेकौ। आश्विनं प्रतिगृह्णा

तिाएतुवसुःसंयद्वसुः।होतरुपह्वयस्व।होतर्वद्भक्षणं।द्विरःप्रदक्षिणंपर्या
हृत्याश्रोत्रेयोष्ठौकयित्वा।भक्षणं।सशेकासकौ।होतश्चमसे।होतुर्भक्ष
निःशेषासेकौ।पुराडाशमात्रामैन्द्रवायवेप्रास्यति।पयस्यांमैत्रावरु
णे।आश्विनेधानाः।तानिप्रतिप्रस्थाताहारिणस्यहविर्धानस्योत्तरे
वत्मनिनिदधाति।प्रत्यक्संस्थानि।इडामादधाति।चमसांश्चोपधं
ति।सर्वैश्चमसिनोमुखमात्रे।होतृश्चमसमध्वर्युः।इडामध्यासु
रोडाशखंडंनिष्काश्यहोत्रेइडासमर्पणादिमयीदमितिजपांतंचतु
र्धाकरणवर्ज्जंकृत्वेडामाग्नीध्रीयएवनिदधाति।अवांतरेडाभक्ष

णं होतुः। इडोपह्वाने कृते चमसभक्षणं। पूर्वं त्रिषु सवनेषु यजमानस्य छंदोगो क्तोस्तवन प्रार्थना। सा चैवं। अग्निर्मे होता स मोपह्वयतामित्युपांशूक्त्वा होतरुप
माह्वयस्वेत्युच्चैर्ब्रूयात्। एवं सर्वत्र। आदित्यो मेऽध्वर्युः स मोपह्वयतां। अध्वर्य
उपमाह्वयस्व। इन्द्रो मामे ब्रह्मा स मोपह्वयतां। ब्रह्मन्नुपमाह्वयस्व। पर्जन्यो मउ

द्गाता स मोपह्वयतां। उद्गातरुपमाह्वयस्व। आपो मे होत्राशंसिनस्ते मोपह्वयंतां॥
होत्राशंसिन उपमाह्वयध्वं। रश्मयो मे चमसाध्वर्यवस्ते मोपह्वयंतां। च
मसाध्वर्यव उपमाह्वयध्वं। होत्रादय उपहूत इति प्रत्येकं पह वदेद्धारिति॥
होतृचमस्तेन सोमं भक्षयतः। पूर्वं होमकर्तुर्भक्षः पश्चाद्वषट्कर्तुः सर्वत्र॥

होतृचमसेऽध्वर्युः प्रतिप्रस्थातरुपह्वयस्व होतरुपह्वयस्वेत्युक्तो भक्षयति॥ होतृचमसे प्रतिप्रस्थाता अध्वर्यउपह्वयस्वेत्युक्तो भक्षयतीत्यग्रे सर्वत्र ज्ञेयं। स्वचमसे होता अध्वर्यउपह्वयस्व प्रतिप्रस्थातरुपह्वयस्वेत्युक्तो भक्षयति। ब्रह्मचमसे होता ब्रह्मन्नुपह्वयस्वेति पृष्ट्वा। स्वचमसे ब्रह्मा होतरुपह्वयस्वेति पृष्ट्वा। तस्मादुद्गातृचमसं नान्यो भक्षयेदिति निषेधादुद्गातृचमसे होमकर्तृत्वेऽपि द्वैर्भक्षाभावः सर्वत्राऽऽद्गातारश्च स्वचमसेऽन्योन्यं परस्परं क्रमेण पृष्ट्वा भक्षयंति। यजमानचमसे होता सुन्वन्नुपह्वयस्वेति पृष्ट्वा। स्वचमसे यजमानो होतरुपह्वयस्वेति पृष्ट्वा। प्रशास्तृ

चमसेहोताप्रशास्तरूपह्वयस्व अध्वर्यउपह्वयस्वेत्यु भौप ह्वा। स्वचम
सेप्रशास्ताहोतरूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्क भौप ह्वा। ब्राह्मणा
च्छंसि चमसेहोताब्रह्मन्नुपह्वयस्व अध्वर्यउपह्वयस्वेत्स्क भौप ह्वा। स्व
चमसेब्राह्मणाच्छंसिहोतरूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्क भौप ह्वा। पो
त्न चमसेहोतापोतरूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्क भौप ह्वा। स्व चमसे
पोताहोतरूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्क भौप ह्वा। नेष्ट्र चमसेहोता
नेष्टरूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्क भौप ह्वा। स्वे चमसेनेष्टाहोतरूप
ह्वयस्व अध्वर्यउपह्वयस्वेत्स्क भौप ह्वा। आग्नीध्र चमसेहोता अग्नी

प्र॰ स्तो॰

॥१८७॥

ड्डुपहूयस्व अध्वर्य उपहूयस्वेत्यभौप्रष्ट्वा। स्वचमसे आग्नीध्रो होतृरूप
हूयस्व अध्वर्य उपहूयस्वेत्यभौप्रष्टूा। अत्राऽध्वर्युप्रतिप्रस्थात्रोः शु
क्रामंथिशेषस्य होमाभिषवनिमित्तं। होतुर्वषट्कारनिमित्तं सर्वेषु। इत
रेषां चमसिनां प्रस्थितयागनिमित्तसमाख्यानिमित्तं। स्वचमसे होता
पुनरध्वर्युप्रतिप्रस्थातारं पृष्ट्वा समाख्यानिमित्तं सशेषं भक्षयति। इति
शुक्रामंथिनोः सह सर्वचमसानां होमनिमित्तो महाभक्षः। अथ पुनर
भ्युन्नीतहोमनिमित्तः पंचानां भक्षः। तत्र प्रशास्तृचमसे अध्वर्युर्होत
रूपहूयस्व प्रशास्तरुपहूयस्वेत्यभौप्रष्ट्वा। स्वचमसे प्रशास्ता होत

॥१८७॥

रूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्र भौ प ष्ठ। ब्रह्मणाच्छंसि चमसे ऽध्वर्युर्होतरू
पह्वयस्व ब्रह्मन्नुपह्वयस्वेत्स्र भौ प ष्ठा। स्व चमसे ब्राह्मणाच्छंसी होतरूपह्व
यस्व अध्वर्यउपह्वयस्वेत्स्र भौ प ष्ठा। पोतृ चमसे अध्वर्युर्होतरूपह्वयस्व
पोतरूपह्वयस्वेत्स्र भौ प ष्ठा। स्व चमसे पोताहोतरूपह्वयस्व अध्वर्यउप
ह्वयस्वेत्स्र भौ प ष्ठा। नेष्टृ चमसे अध्वर्युर्होतरूपह्वयस्व नेष्टरूपह्वयस्वे
त्स्र भौ प ष्ठा। स्व चमसे नेष्टाहोतरूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्र भौ
प ष्ठा। आग्नीध्र चमसे अध्वर्युर्होतरूपह्वयस्व अग्नीदुपह्वयस्वेत्स्र भौ
प ष्ठा। स्व चमसे आग्नीध्रोहोतरूपह्वयस्व अध्वर्यउपह्वयस्वेत्स्र भौ प

ह्वा॥ प्रश्नो न्तरं उपहूत इति सर्वे प्रत्यक्षं पहवेदयः॥ पुनरभ्युन्नीतेषु अध्वर्योर्हि
माभिषवनिमित्तोभक्षः॥ प्रशास्त्रो दीनां वषट्कार समाख्यायो स्तंत्रेण भक्षः॥
यद्या प्रशास्त्रादय श्चैवमेव होत्रध्वर्यू एवं ह्वा पुनः समाख्यानिमित्तं पृथग्भक्ष
यंति नमंत्रेण॥ उक्तं च भाष्ययोः॥ पंच पंच च पंच स्वित्ति॥ इति चमसभक्षः॥
आप्यायस्वेति द्वाभ्यां चमसानालंभंते॥ चमसिनः॥ सोमं चासिंचति मं
त्रेणासंभवात्॥ आप्यायनं पूलभतः॥ आप्यायस्व समे॰ संगध्ये॥ संलेप
पयांसि स॰ स्युत्तमानिधिष्ठ॥ ते सर्वभक्षास्तान्॥ दक्षिणस्य हविर्द्धान
स्य पश्चाद् दक्षन्निदधति चमसानधः॥ चमसाध्वर्यव एवोदकांस्थान्॥

तेनाराशंऽसा आ वैश्वदेवात् । पुरोडाशशकलमादाय समुपहूताः स्मइ
त्यक्त्वोन्निष्ठसि । समुपहूताः स्मः । अच्छावाकायैनत्प्रयच्छन्नाहाच्छावाक
वदस्वयत्तेवाद्यमिति । अच्छावाक वदस्व यत्ते वाद्यं । उपो अस्मानिति ब्रूव
न्निहोतारम्माहोपहवमयं ब्राह्मण इच्छते त८ होतरूपह्वयस्वेति । उपहवेम
यं ब्राह्मण इच्छते त८ होतरूपह्वयस्व । उपहूत उन्नीयमानायानुवाच
यति । उन्नेतैव प्रेष्यति । उन्नीयमानायानु ब्रूहि । अच्छावाकमुन्नयति
होत्राचमसवत्सर्वं । उन्नेतोत्तरवेदिमपरेणाच्छावाकचमसमादधा
ति क्रम्याऽश्राव्याह । अच्छावाक यज । वषट्कारेनुवषट्कारे च सशेषहोमः ।

इदमिंद्राग्निभ्यां। इदमग्नये स्विष्टकृते। अपउपस्पृश्य। त्वंपं[illegible]लिं जपति। तिष्ठन्नेव। त्वंपंक्तुहोत्रा॰ सुहुतायत्स्वाहा। उत्तरेण हविर्द्धानं सदसि गत्वा अच्छावाकोपहु यस्वेत्यच्छावाकं पृष्टो पहूत इति प्रत्युक्तो भक्षयति। अच्छावाकः स्वचमसे अध्वर्युउपह्वयस्वेत्यध्वर्युं पृष्ट्वा भक्षयित्वाऽप्याययति। आनिधानात्कृत्वा। पूर्वश्चाग्नीध्रादत्तः। आग्नीध्रे हविर्यज्ञर्त्विज इडां प्राश्नंति। अन्यत्र शरीरस्थि त्यर्थं। ब्रह्महोत्रध्वर्युमैत्रावरुणाग्नीध्राणां पंचानामिडाभक्षो यजमान स्य सवनीयहविःशेषभक्षश्च। पत्नीचान्यशालायां। स्मार्त्ताग्निपक्वमोद नादि हविष्यमन्नं सैंधवाज्यसंस्कृतमत्तु ग्रहपात्प्रागेव भुक्त्वाऽचम्या

स्ते ॥ समस्य मार्जनं पश्चादुत्तरवेदेः ॥ आग्नीध्रीय एवेति केचित् ॥ न पवित्रप्रतिपत्तिः ॥ भागसमर्पणं ॥
स्वासनसन्निध्यौ सुगुप्ते ब्रह्मयजमानयोर्भागनिधानमग्निमभागानां च तत्रैवैकीकरणं ॥ उपवि
श्येध्वावकक्रतुग्रही हेस्वरतः ॥ द्रोणकलशादुपयामगृहीतोसि मध्यवेति द्वेद्वादश प्रतिमंत्रमध्व
र्योः पूर्वः पूर्वो मंत्र उत्तर उत्तरः प्रतिप्रस्थातुः ॥ युगपत्प्रथमौ गृह्णीतः ॥ उपयामगृहीतोसि मध
वे त्वेत्येवाऽध्वर्युर्गृह्णाति ॥ उपयामगृहीतोसि मधवे त्वा । गृह्णामि । उपयामगृहीतोसि माध
वाय त्वेति प्रतिप्रस्थाता ॥ उपयामगृहीतोसि माधवाय त्वा । गृह्णामि ॥ परिमार्जनमुभयोः ॥
नसादनं ॥ सावित्रवत्तु ग्रहप्रतिषेधाच्च ॥ एतावेव बासंतिकौ ॥ प्रतिप्रस्थाता तत्रैवास्ते ॥ क्रतु
नेति षड्द्रेष्यतः ॥ क्रतुग्रहेऽनुवषट्काराभावः सर्वत्र ॥ अध्वर्युर्निष्क्रम्यातिक्रम्याश्राव्याह ॥

प्र॰ सो॰

॥१९०॥

ऋतुनाप्रैष्य । इदमिंद्राय । सर्वहुतः प्रागुत्तमाभ्यां । निष्क्रामत्येकः प्रविशतीत
रउत्तरउ त्तरः प्रतिप्रस्थाता परकालत्वात् । उभयतोध्वर्युपात्रेण परिगृह्णा
ति । अव्यवायेन । प्रतिप्रस्थाताऽतिक्रम्याश्राव्याह । ऋतुनाप्रेष्य । इदंमरुद्भ्यः ।
व्यत्यासं मध्ये प्रचरणं च सर्वेषां । उपयामगृहीतोसि शुक्राय त्वेत्येवाध्वर्युर्गृ
ह्णाति । उपयामगृहीतोसि शुक्राय त्वा । गृह्णामि । परिमार्जनं । अतिक्रम्याश्रा
व्याह । ऋतुनाप्रेष्य । इदंसद्भे । उपयामगृहीतोसि शुचये त्वेति प्रतिप्रस्थाता ।
उपयामगृहीतोसि शुचये त्वा । गृह्णामि । परिमार्जनं । एतावेव ग्रैष्मौ । अतिक्रम्या
श्राव्याह । ऋतुनाप्रेष्य । इदमग्नये । उपयामगृहीतोसि नभसे त्वेत्येवाध्वर्युर्गृ

॥१९०॥

ह्णाति। उपयामगृहीतोसि नभसे त्वा। गृह्णामि। परिमार्जनं। अतिक्रम्याश्राव्याह। ऋ
तुनाप्रे३ष्य। इदमिंद्राय। उपयामगृहीतोसि नभस्याय त्वेति प्रतिप्रस्थाता। उपयामगृ
हीतासि नभस्याय त्वा। गृह्णामि। परिमार्जनं। एतावेव वार्षिकौ। अतिक्रम्याश्राव्याह॥
ऋतुनाप्रे३ष्य। इदं मित्रावरुणाभ्यां। ऋतुभिरिति चतुरः पात्रमुखे विपर्यस्य। उप
यामगृहीतो सीषे त्वेत्येवाध्वर्युर्गृह्णाति। उपयामगृहीतासीषे त्वा। गृह्णामि। परि
मार्जनं। अतिक्रम्याश्राव्याह। ऋतुभिःप्रे३ष्य। इदं देवाय द्रविणोदसे। उपयामगृही
तोस्यूर्ज्ये त्वेति प्रतिप्रस्थाता। उपयामगृहीतोस्यूर्जे त्वा। गृह्णामि। परिमार्जनं॥
एतावेव शारदौ। अतिक्रम्याश्राव्याह। ऋतुभिःप्रे३ष्य। इदं देवाय द्रविणोदसे। उप

यामगृहीतासिसहसेत्वेसेवाध्वर्युर्गृह्णाति।उपयामगृहीतोसिसहसेत्वा।गृह्णामि।परि
मार्जनं।अतिक्रम्याश्राव्याह।ऋतुभिःप्रेष्य।इदंदवापद्रविणोदसे।उपयामगृहीतोसिस
हस्यायत्वेतिप्रतिप्रस्थाता।उपयामगृहीतोसिसहस्यायत्वा।गृह्णामि।परिमार्जनं।
एतावेवहैमंतिकौ।अतिक्रम्याश्राव्याह।ऋतुभिःप्रेष्य।इदंदेवापद्रविणोदसे॥
षड्हुतमौ॥पात्रमुखेविपर्यस्य॥उन्नमौच॥युगपद्गृह्णीतः॥उपयामगृहीतोसितपसेत्वेत्ये
वाध्वर्युर्गृह्णाति॥उपयामगृहीतोसितपसेत्वा।गृह्णामि॥उपयामगृहीतोसितपस्यायत्वेति॥
प्रतिप्रस्थाता॥उपयामगृहीतोसितपस्यायत्वा।गृह्णामि॥परिमार्जनमुन्नयोः॥एतावेवशै
शिरौ॥प्रतिप्रस्थातातत्रैवास्ते॥अध्वर्युर्निष्क्रम्यातिक्रम्याश्राव्याह॥ऋतुनाप्रेष्य॥

यजमानःप्रेषितोहोतरेतद्यजेतिब्रूयादध्वर्यूंच।अध्वर्यूयजतमितिप्रशास्त्रा
क्तेहोतरेयजेत्यध्वर्युप्रतिप्रस्थातारौब्रूयातामध्वर्युरेववाब्रूयादुपाध्यायाग्र
हात्।सशेषहोमः।इदमश्विभ्यां।प्रतिप्रस्थाताऽतिक्रम्याश्राव्याह।ऋतुनाप्रे
ष्य।गृहपतेरेतद्यजेतिप्रशास्त्रोक्तेहोतरेतद्यजेतियजमानोब्रूयात्।सशेष
होमः।इदमग्नयेगृहपतये।त्रयोदशंगृह्णीयादिध्मन्नुपयामगृहीतोस्यंऽह
सस्पतयेत्वेति।अध्वर्युःपूर्वस्यशेषे।उपयामगृहीतोस्यंऽहसस्पतयेत्वा।।
गृह्णामि।परिमार्जनं।अतिक्रम्य।प्रतिप्रस्थातारमनुजुहोति।सशेषं।यद्ये
कादशाशेषंपात्रांतरेकृत्वागृहीत्वासर्वंजुहुयात्।उभयोरेकएवाऽग्नये

अध्वर्युर्होतारं प्रतिप्रस्थातारं चोपहूय सशेषं भक्षयति॥ होताध्वर्युं प्रतिप्रस्थातारं चोपहूय सशेषं भक्षयति॥ प्रतिप्रस्थाताध्वर्युं होतारं च पृष्ट्वा सशेषं भक्षयति॥ होताध्वर्युप्रतिप्रस्थातारौ पुनः पृष्ट्वा निःशेषं भक्षयति॥४॥

गृह्णपल यइति स्यागः॥ अन्यतरस्मिंश्छेषो वृत्ताावशिनैंद्रागं गृह्णाति प्रतिप्रस्था तेंद्राग्नी इति। शुक्रास्य परिप्लवया। इंद्राग्नी आगतं सुतं तोसी अग्निभ्यां त्वा। गृ ह्णामि। परिमार्जनं। प्रदक्षिणेत रथा वृत्ती। सादनं। एष ते योनिरिंद्राग्निभ्यां त्वा। सादयामि। आहरेति भक्षं ॥ उत्तरेण हविर्द्धाने गत्वाऽध्वर्युर्होतारं प्रतिप्रस्थातारं चोपहूय सशेषं भक्षयति। होता चाऽध्वर्युप्रतिप्रस्थाता रौ पृष्ट्वा सशेषं भक्षयति प्रतिप्रस्थाताध्वर्युं होतारं च पृष्ट्वा सशेषं भक्षयति। अत्राऽध्वर्युप्रतिप्रस्थात्रोः पुनर्होत्रे नुपृष्ट्वा नमेवेति दशा नां पूर्वेषां सर्वहुत पक्षे भक्षप्रकारः। द्वादशानामप्यसर्वहुत पक्षे तु

२ उभयोः पुनर्नैभक्षणं भवती सर्वः होतुस्तु पुनर्भक्षणं भवत्येव॥ वषट्कारहूयस्य निमित्तत्वात्॥२॥

होतृपोतृनेष्ट्राग्नीध्रब्राह्मणाच्छंसिप्रशास्तृभ्यो विपर्यस्य पात्रं । होतृपोतृने
ष्ट्रच्छावाकानां च विपर्यस्य पात्रं । होतुर्द्विर्भक्षणमिति सूत्रत्रयोक्तानुक्रमेण हो
तुर्विंशतिराह्वाने ।२०। पोतुर्नेष्टुर्द्विरुत्तरा ।२२। त्रिरुत्तरा ।२३। चतुर्णां तु शेषे
त्वष्टादश ।१८। स्मृता इत्यपि युक्तप्रणीतसंख्याभिश्च निमित्तोत्पत्तिक्रमे
ण स्वस्वनामपरित्यागेन होमाभिषवकर्तुः पूर्वप्रार्थनापूर्वकं प्रति भक्षं
सर्वेभ्य उपहूयाऽस्य मन्त्रं तेनैव पात्रेणाक्तमुखविपर्यासेन च सर्वे सूत्र
त्रयोक्ताः स्वस्वहोमाभिषवपूर्वकाः सशेषं भक्षयन्त्यंते होतुर्निश्शेषभ
क्षणमिति गुरूपदेशात् त्रयोदश पक्षा विकृतावपि च सुगममेव । उपह

प्र.सो.

॥१९३॥

यप्रार्थनं सक्त्सक्तु देवेति केचित्तद्युक्त तररूपं कर्काशायो प्यवमिति
दवभाष्ये। इत्स सर्वहुतन पक्षेभक्षप्रकारः॥ निहृत्यपात्रे। अध्वर्युमार्जाली
ये प्रक्षाल्योत्तरेणहविर्द्धानं गत्वाखरेसादयति। सर्वत्रानादशेमार्जालीये
पात्रप्रक्षालनं खरेसादनं चाध्वर्योरिव। गतस्तोत्रोऽयमैंद्राग्नग्रहो बहि
ष्पवमानेन। होतुःपुरस्तात्प्राङास्ते। अभिहुतः शोꣳसावेत्या अध्योथा
मोदैवेतिप्रतिगृह्णातिप्रणवावसानयोः॥ ओथामोदैव। ओमितिवा
शस्त्रांते नित्यं वा गतो वा पूर्वः॥ सर्वत्र शस्त्रांते ओमिति प्रतीगीर्य प्रद
क्षिणेतरथावनीचकर्तव्ये। ऐंद्राग्नमादपाश्राव्याहोत्त्वयशापज

॥१९३॥

सोमस्येत्येषप्रैषः सर्वशस्त्राणां।नाराशंसानांचकंपनं हूयमाने।[illegible]नस
ध्वर्यवोहविर्धानस्यवतिष्ठंतेः मरुत्वतीयमाहेंद्रऐंद्राग्नवैश्वदेवयोः।ना
राशंसाः प्रकंप्यंते ग्रहेष्वेतेषु पंचस्वित्युक्तत्वात्।चमसाध्वर्यवोहविर्द्धा
नएवतिष्ठंतेः स्वस्वहस्तस्थानुद्दिष्टैः प्राङ्मुखैनेनस्वस्वचमसान्कंप
यंत्यत्त्वस्थ्यविग्रहाऽग्निमारुतवर्जंसर्वशस्त्रग्रहे हूयमानेसर्वत्र।अ
ध्वर्युरतिक्रम्याश्राव्याह।उक्थशायजसोमस्य।वषट्कारेऽनुवषट्कारेच
नशेषहोमश्चमसानांकंपनं।इदमिंद्राग्निभ्यां।इदमैंद्रायेत्यस्येत्यत्र्यते।
अपकृपस्यशर्य।हुत्वाप्रदक्षिणेतरथावृत्तौ चरुस्थाहुतशेषस्याऽध्वर्यु

होतृभ्यां निःशेषभक्षणं। चमसिनश्चानुपहूयैवं स्वं स्वं चमसं सशेषं भक्षयित्वाऽ
प्याय्यस्वस्व चमसाध्वर्यवि प्रयच्छंति। ते च नाराशंसस्थाने यथोक्तक्रमेण स्था
पयंति च। मार्जाली ये पात्रं प्रक्षाल्य हविर्द्धानाऽपरद्वारेण प्रविश्य खरे सादनं।
भक्षप्रभृत्या निधानात्कृत्वा। वैश्वदेवं गृह्णाति। शुक्रपात्रेण द्रोणकलशादन्वा
रब्धे वैौमास इति। परिप्लवया। ओमासश्चर्षणी॰ तोसि विश्वेभ्यस्त्वा देवेभ्यः। गृ
ह्णामि। परिमार्जनं। प्रदक्षिणतरथावृत्ती। सादनं। एष ते योनिर्विश्वेभ्यस्त्वा दे
वेभ्यः। सादयामि। शुक्रे पूतभृत्यासिच्य द्रोणकलश पवित्रयोजनं। अ
धोधोक्षं प्रत्यंचं द्रोणाकलशमत्यूह्योपर्युपर्यक्षं पवित्रमस्मिकरो

लिश्शुक्लं जीवोर्णानां॥ ततः सवनीयपुरोडाशनिर्वापः॥ पशुपुरोडाशप्रथमं
सवनीयान्निर्वपति पयस्यावर्जं। शालाद्वार्यस्योत्तरतो दक्षिणतश्चाग्धिर्दिदिति
चतुरासनं। शालाद्वार्ये वाचस्पतिप्रैषः। शालाद्वार्ये दक्षिणेन स मंत्रं ब्रह्म
स्तो। यजमानवाचंयम छेति प्रैषः। पात्रासादनं। शूर्पाग्निहोत्रहवणी। ए
कोनविंशतिकपालानि कर्परं च। एकं कृष्णाजिनं उलूखलमुसलं॥
शम्योपवेषउपसर्जनी पात्रं च। पुरोडाशपात्री त्रिबिला पात्री च। श्रुता
वदानं पक्षे व्रीहयौषधयवपिष्टानि यवाश्चेति। करंभदधिषडवत्तयो
रूपकल्पनं। चालनस्य च। स्फ्यापहितपात्रीकरणादि। ग्रहणे। अग्न

येजुहू॰। इंद्रायजु॰। इन्द्रायहरिवतेजु॰। इद्रायपूषण्वतेजु॰। प्रणीताभ्यः प्रो
क्षणीः संस्कृत्य। प्रोक्षणे। अग्नयेत्वाजु॰। इन्द्रायत्वाजु॰। इन्द्रायहरिव
तेत्वाजु॰। इंद्रायपूषण्वतेत्वाजु॰। पात्राणिप्रोक्षणीनांनिःशेषकरणं।
कृष्णाजिनादानादिकुक्कुटाहननवर्जंतुषनिरसनांतंकृत्वा चर्चकः।
इदमग्नेरिंद्रस्यच। इदमिंद्रस्यहरिवतइन्द्रस्यपूषण्वतश्च। अग्निरिं
द्रयोर्धान्यमसिधिनुहिदेवावित्स्फहितेनदृषघावापः। अर्द्धपिष्टे अष्ट
कपालपूर्वकपरांतंकपालोपधानेनानदोह्यः। संयवनांते चर्चकः।
इदमग्नेः। इदमिंद्रस्य। अनुक्तंपात्रेसमार्गीतंप्रातःसवनवत्। पुनः

सम्मार्जनानां यत्नेन रक्षणं। व्रीहिमयपुरोडाशपक्षे नानाबीजधर्मविशे
षः प्रागुक्त इति सवनीयनिर्वापः। ततः प्राग्द्वारेण निष्क्रम्य पशुविशासना
द्युक्त्वा यामवदानप्रक्षेपांतमग्नीषोमीयपशुवत्। भागावदानग्रहणं निय
मेनेति विशेषः। ततः शमितारं शास्ति। त्रिः प्रच्यावयतात्त्रिः प्रच्युतस्य हृ
दयमुत्तमं कुरुतादित्येतावान्प्रथमशमित्रनुशासनरूपः प्रैषः। स प्रातः
सवन आलब्ध आतृतीयसवनाच्छ्रप्यमाणः पशोरिति श्रुतत्वात्पशोर्दाहभ
यात्सावधानेन तृतीयसवनं यावत्स्वल्पाल्पकाष्ठप्रक्षेपेण शमित्रा श्रपणं
कर्तव्यं। ततः प्राग्द्वारेण प्रविश्य। स्तोत्रमुपाकरोति तत्पणाभ्यां ग्रहमुपस्थ

श्येोपावर्त्तध्वमिति। हविर्द्धानाऽपरद्वारेणैव निष्क्रम्य प्रस्तोत्रे तृणे प्रयच्छन्नाह।
उपावर्त्तध्वं। एवं धुर्येषु सर्वत्र। प्रस्तोत्रा एषोत्तमेत्युक्ते होतुपुरस्तात्प्राङ्गुनस्तद्
त्यादि। शस्त्रांते वैश्वदेवमादायालिकम्याश्राव्याह। उक्थशापजे सोमस्य।
वषट्कारेनुवषट्कारे च सशेषहोमश्चमसानां कंपनं। इदं विश्वेभ्यो देवेभ्यः॥
इदमग्नये स्विष्टकृते। अपउपस्पृश्य। हुत्वा प्रदक्षिणेतरथावृत्ती च कृत्वा
हुतशेषस्याऽध्वर्युहोतृभ्यां निःशेषभक्षणं। चमसिनश्चानुपहूयैव स्वं स्वं
चमसं सर्वभिक्षं भक्षयंति। सर्वभक्षाश्चमसाः। मार्जालीये पात्रप्रक्षा
लनं। अध्वर्युः कृत्वा। हविर्द्धानाऽपरद्वारेणैव प्रविश्य खरे सादयति॥

चमसाध्वर्यवश्च चमसान्मार्जालीये प्रक्षाल्योत्तरवेदिमपरेण प्रशास्तुश्चमसैस्स
पूर्वमुदकं संस्थाप्य संस्थापयंति। उत्थाय विगृह्णाति त्रेधं देवेभ्यस्त्वेति सर्वेभ्यो मि
त्रावरुणाभ्यां त्वेति प्रशास्त्रे। उत्थाय पात्र एव संस्थाली मुखेनैव देवेभ्यस्त्वा दे
वाव्यं यज्ञस्यायुषे गृह्णामि। परिमार्जनं। प्रदक्षिणेतरथावृत्ती। तूष्णीं छ
सादनं। यस्य विग्रहस्तस्य प्रथमं चमसमुन्नयति। उन्नेतेव। उत्थाय
विग्रहे सर्वत्रोपस्तरणोन्नयनाभिधारणानि पूतभृत एव। स्तोत्रमुपाकरो
ति। तृणाभ्यां ग्रहमुपस्पृश्य हविर्द्धानाऽपरद्वारेणैव निष्क्रम्य प्रस्तोत्रे तृणे
प्रयच्छन्नाह-उपावर्त्तध्वं। प्रस्तोत्रा एषोत्तमेत्युक्ते प्रशास्तुः पुरस्ताद्भास्त

इत्यादि। शस्त्रांते उक्थ्यपात्रे विगृहीतं ग्रहमादाय चमसाध्वर्यवश्च चम
सानादाय गच्छंति च। उक्थशायजसोमानामिति प्रैषोऽनाराशंसेषु।
निहितेषु चेड्होमः सशस्त्रस्य। तदा सर्वे। चमसानामपि होमः। आश्राव्या
ह। उक्थशायजसोमानां। वषट्कारेनुवषट्कारे च सशेषहोमश्चमसानां
च। इदं मित्रावरुणाभ्यां। इदमग्नये स्विष्टकृते। अपउपस्पृश्य। हुत्वाप्रद
क्षिणेतरथावृत्ती च कृत्वा। ग्रहशेषं चास्मिन्नासिंचति। उक्थ्यपात्रं
खरे सादयित्वा प्रशास्तृचमसं गृहीत्वा चमसस्थस्य हुतशेषस्याऽ
ध्वर्युप्रशास्तृभ्यां सशेषं भक्षणं। ततः प्रशास्ताऽस्य चमसं निधाय

होत्रादिचमसेषु होत्रादीन्पृष्ट्वा वषट्कारनिमित्तं भक्षयति। होत्रादपश्चैकं
प्रशास्तारं पृष्ट्वा स्वस्वचमसेषु समाख्यानिमित्तं सर्वभक्षं भक्षयंति॥
प्रशास्त्रापि स्वचमसःऽध्वर्युं पृष्ट्वा समाख्यानिमित्तं सर्वभक्षं भक्षयति
चासर्वभक्षाश्चमसाः। चमसाध्वर्यवश्चमसान्मार्जालीये प्रक्षा
ल्योत्तरवेदिमपरेण ब्राह्मणाच्छंसिचमसपूर्वमुदकंस्थान्स्थाप
यंति। एवं प्रतिप्रस्थातोत्तराभ्यां मिश्राप ह्येति ब्राह्मणाच्छंऽसिनइह्ना
ग्निभ्यां त्वेत्यच्छावाकाय। हविर्द्धानाऽपरद्वारेणैव प्रविश्योत्सृज्यावि
गृह्णाति द्वे धंदेवेभ्यस्त्वेति। देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि।

परिमार्जनं।प्रदक्षिणेतरथावृत्ती।तूष्णीमासादनं।यस्यविग्रहस्तस्यप्र
थमंचमसमुन्नयति।उन्नेतैव।स्तोत्रमुपाकरोतितृणाभ्यांग्रहमुपस्प
श्यहविर्धानाःपरद्वारेणैवनिष्क्रम्यप्रस्तोत्रेतृणेप्रयच्छन्नाह।उपावर्त्तध्वं।
प्रस्तोत्रापरेषोत्तमेत्युक्तेःब्राह्मणाच्छंसिनःपुरस्तात्प्राङासीत इत्यादि।शस्त्रं
तेउक्थ्यपात्रेविगृहीतंग्रहमादायचमसाध्वर्यवश्चचमसानादायप्रा
च्छंतिच।उक्थ्यशायजसोमानामितिप्रेषोनाराशंसेषु।आश्राव्याह।
उक्थ्यशायजसोमानां।वषट्कारेऽनुवषट्कारेचसर्वेभक्षोमन्त्रश्चमसानांच।
इदमिंद्राय।इदमग्नयेस्विष्टकृते।अपउपस्पृश्य।हुत्वाप्रदक्षिणेतरथावृ

त्री चकृत्वा। ग्रहशेषं चास्मिन्नासिंचति। उत्थाय पात्रं खरे सादयित्वा ब्राह्मणा

च्छंसि चमसं गृहीत्वा चमसस्थस्य हुतशेषस्य प्रतिप्रस्थाता ब्राह्मणाच्छं

सिभ्यां सशेषं भक्षणं। ततो ब्राह्मणाच्छंसी स्वचमसं निधाय होत्रादि च

मसेषु होत्रादीन्दृष्ट्वा वषट्कारनिमित्तं भक्षयति। होत्रादयश्चैकं ब्राह्मणा

च्छंसिनं दृष्ट्वा स्वस्वचमसेषु समाख्यानिमित्तं सर्वं भक्षं भक्षयंति। ब्रा

ह्मणाच्छंस्यपि स्वचमसे प्रतिप्रस्थातारं दृष्ट्वा समाख्यानिमित्त सर्वं भक्षं

भक्षयति च। सर्वभक्षाश्चमसाः। चमसाध्वर्यवश्चमसान्मार्जालीये

प्रक्षाल्योत्तरवेदिमपरेण। ऽच्छावाकचमपूर्वमुदकसंस्थान्स्थापयंति।

प्र॰ सो॰

१९८९

प्रागच्छावाकः विग्रहान्सोमोपावहरणं। ईषांतरेणावशिष्टं सर्वं सोम
मद्रिषु संमुखेषु निदध्यात् इह देह्येति। यजमानेसोमान्वारब्धो। हृदेत्वा मनु
पावरोह। विश्वास्त्वा मितिविसृज्योपतिष्ठते। यजमान एव। विश्वास्त्वां
प्रजाउपावरोहंतु। वसतीवर्यद्भ्यश्चासिंचत्याधवनीये। विश्वेदेवा मरु
त इन्द्रो अस्मानस्मिंद्द्वितीये सवने नजह्युः। आयुष्मंतप्रियमेषां वदंतो
वयं देवानां सुमतौस्याम। एकधनार्थं चाप्रत्येकं मंत्रः॥ विश्वेदेवा
मरुत॰ सुमतौस्याम॥३॥ प्रातिप्रस्थाताह विर्धानाद परद्वारेणैव प्रवि
श्योत्क्रम्य शेषं गृह्णाति देवेभ्यस्त्वेति। देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णा

१९८९

मि।परिमार्जने।प्रदक्षिणेलरथाव्दत्मी।तूष्णीं७सादनं।यस्यविग्रहस्तस्य
प्रथमचमसमुन्नयति।उन्नेतैव।स्तोत्रमुपाकरोति।तणाभ्यांग्रहमु
पस्पृश्य।हविर्द्धानाःपरद्वारेणैवनिष्क्रम्यप्रस्तोत्रेतणेप्रयच्छन्ताहा।उपा
वर्त्तध्वं।प्रस्तोत्रा।एषोत्तमेत्युक्तेऽच्छावाकस्यपुरस्तात्प्राङासत्त इत्यादि।
शस्त्रांतेउत्तरस्यपात्रेविगृहीतंग्रहमादायचमसाध्वर्यवश्चचमसाना
दायगच्छेतिच॥उत्तरश्चशायजसोमानामितिप्रैषोऽनाराशंऽ.सेषु।आश्रा
व्याहाउत्तरश्चशायजसोमानां।वषट्कारेऽनुवषट्कारेचसशेषहोमश्चमसा
नांचाऽदमिंद्रायाऽदमग्नयस्विष्टकृते।अपउपस्पृश्य।हुत्वाप्रदक्षिणेत

रथाक्वत्ती च कृत्वा। गृहशेषं चाग्निम्नासिंचति। उत्थाय पात्रं खरे सादयित्वा
ऽच्छावाकचमसं गृहीत्वा चमसस्थस्य हुतशेषस्य प्रतिप्रस्थात्रच्छावाकाभ्यां
सशेषं भक्षणं। ततोऽच्छावाकः स्वचमसं निधाय होत्रादिचमसेषु होत्रादीन्य
द्वावषट्कारनिमित्तं भक्षयति। होत्रादयश्चैकमच्छावाकं पृष्ट्वा स्वस्वचम
सेषु समाख्यानिमित्तं सर्वभक्षं भक्षयति। अच्छावाकोऽपि स्वचमसे प्रतिप्रस्था
तारं पृष्ट्वा समाख्यानिमित्तं सर्वभक्षं भक्षयति च। सर्वभक्षाश्चमसाः।
चमसाध्वर्यवश्चमसानाजालीये प्रक्षाल्य हविर्द्धानमध्ये उत्तरस्य हवि
र्द्धानस्य प्रागक्षादधः स्वस्थाने होत्रादिक्रमेणोदकसंस्थानस्थापयंति। च

रितेसर्वैःप्रशास्त्तःप्रसुहीतिब्रूयात्।सदसःपूर्वद्वारेतिष्ठन्नेवप्रशास्त्तःप्रसु
हि।सर्पतेतिमैत्रावरुणःप्रत्याह।प्रसूतानां ७ सर्पणंप्रसूतानां ७ सर्पणं।
सर्वेऋत्विजःसदसोनिष्क्रम्यमूत्रपुरीषाद्यावश्यकार्थंतीर्थेनबहिर्गत्वा
चवेद्यांपुनस्तेनैवपथाप्रत्यागच्छंति॥उत्तरयोःसवनयोरपिसवनांते
प्रशास्त्तःप्रसुहीत्येतत्प्रैषोत्तरमव्यवहितेनैवप्रशास्तुःसर्पतेत्यनुज्ञापू
र्वंबहिर्निष्क्रमणरूपमेवसर्पणंभवति।यथासवनादौसवनादौह्येतत्सर्प
णमित्यत्रोक्तंपूर्वोक्तमेवसर्पणंभवतीतिकात्यायनलाट्यायनाभ्यांवि
वेकः।पितृभूतिकर्काऽनंतदेवादिभाष्येषुदेवयज्ञलावपिचैवमेवास्ती

तिसंतिष्ठतेप्रातः सवनम् ॥ अथमाध्यंदिनसवनम् ॥ आग्नीध्रीयस्याग्रेर्दक्षि
णतस्तूष्णीं ब्रह्मास्ते। आग्नीध्रीयस्य पश्चादुदङ्मुखोपविष्टस्य यजमानस्य
लोकद्वारीयसामगानं सर्वार्थसंस्कृतादाज्यावेक्षमश्च। सर्पणादिमाध्यंदिने
सयजमानाऋत्विजोधिष्ण्योपस्थानादिसदोभिमर्शनादिवाधिष्ण्याभिम
त्रणांतं सवनादिभूतमेतत्सर्पणमित्यत्रोक्तं सर्पणं प्रातःसवनवत्कुर्वंति।
होतृचमसेवसतीवरीः कृत्वा यजमानाय प्रयच्छति। तानि ग्राभ्याः ॥
उष्णीषं ग्रावस्तुते। तच्च सोमोष्णीषं ॥ अथाभिषवः ॥ अंश्वादानप्रभृति
त्रिपर्यायानभिषवान्करोति। अधिषवने पर्युपविशंतीत्या। दिनिम्रा

भ्यासुवाच नांलंकृत्सा। अत्तमभिमिमीतउपा७ श्रुसवनस्यानिंगनश्कृतेः। आ
त्तेग्रा ब्णी न्त्राय त्वेत्यादिभिंर्मंत्रैः पूववत्सोममानं यत्तइतिमितालंभनंच
कृत्वेतरेषां पाणिप्रक्षालनादि॥ भ्यात्रीरुद्रे त्यासिंचतिनिग्राभ्याः। भ्यत्रा
स्थ द्वः सोमस्यपिबत। सोमंचलुर्द्धो विभज्य। माभेरितिप्रहरंति। माभेमा
नसोमः। त्वणायाहंप्रहरामिनलुभ्यऽ सोम॥ इहा३ऽऽऽइहा३ऽऽऽइतिप्रथ
मः पर्यायः। प्रतिप्रहारमिहा३इत्यस्याऽभ्यासेनकुट्टनं। एवमेवापरयोरुत्त
रत्रापियथास्वव्यक्तिधर्मेण। उत्सुंज्यपुनः कुट्टनं। त्वणायाहंप्रहरामिनलुभ्यः
सोम। अविलंबितो द्वितीयः। इहा३इहा इतिद्वितीयः। पुनरुत्सुंज्यपुनः कुट्ट

नें।तृणायाहंप्रहरामिनलुभ्यऽसोम।तूर्णस्तृतीयः।इहाइहाइतितृतीयः।त
तःआप्यायनाद्याधूपाऽहरणांतमितित्रिपर्यायःप्रथमोभिषवः।एवमेव
द्वितीयोभिषवः।तथैवतृतीयस्तत्राऽविलंबितस्थानेऽत्तमेव्हहह्हदिति।
तृतीयेपर्यायेद्वितीयेकुद्दनेव्हहह्हदितिप्रालिप्रहारंप्रयोगः।ततआ
प्यायनाद्याधूयाहरणांतमितितृतीयइतिमहाभिषवः॥नक्षुल्लका
भिषवोद्रोणकलशग्रहणादि।माध्यंदिनेचपंचप्रथमान्।शुक्रप्रभृति
चतुर्णांग्रहणं।शुक्रामंथिनोःपूर्ववद्ग्रहणासादनेकृत्वा।आग्रयणं(ॐ)स्थाल्यौ
याभ्योधाराभ्यः।स्थालीस्थंपात्रांतरेकृत्वाप्रतिप्रस्थाता।तृतीयांधारांनिन

यलि। प्रागुच्चथ्या मरुत्वतीयमृतुपात्रेणेंद्रमरुत्वइत्येकं तरमेके। धारातो गृह्णा
ति। इन्द्रमरुत्वइहपा॰ सी इन्द्राय त्वामरुत्वते। गृह्णामि। परिमार्जनं। सादनं। एष
ते योनिरिन्द्राय त्वामरुत्वते। सादयामि। ततउत्तमथ्य ग्रहणासादने। पूर्णांत्स्रुचा
ली ग्रहान्नर्दूपूर्णं द्रोणकलशं कृत्वा सर्वमासिंचति सुत्वन्न। पाणिप्रक्षालनं॥
समन्वारब्धानिष्क्रमणादिकरोत्याग्नीदग्नीनितिप्रैषात्। प्रक्काउदंचो गच्छंति। ब्रह्म
णो विसंस्थितस्थितसंचरः प्रशास्तुर्धिष्ण्यं वोन्तरेणा पवमाने। पवमानसंस्थितेत्र्च
सवने दक्षिणेनैव। स्वः स्वमितरे स्वः स्वमितरे। सदसि पवमानोपाकरणं॥
अन्यत्सर्वं प्रातःसवनवत्। पशुने हीत्यपकृष्य दधिघर्मायदध्याहरद

क्षिणाउपावर्त्तयेतिप्रैषोपचयः॥स्तोत्रांतेप्रेष्यति। प्राग्वत्। अग्नीदग्नीन्विहर बर्हिस्तृणीहिपुरोडाशाँ२ऽअलंकुरु। प्रतिप्रस्थातर्दधिघर्मायदध्याहरदक्षि णाउपावर्त्तयेतिप्रैषः विशेषः। यथान्यत्रप्रदिष्ण्येष्वाग्नीध्रादंगारान्निव पति। अनुपश्चाद्बर्हिस्तृणामि। पुरोडाशविभस्मीकरणं। पुरोडाशपा त्रीत्रिबिलापात्र्योःस्थापनादि। प्राणदाने। अग्निंगच्छ। इन्द्रंगच्छ। इंद्रंहरि वंतंगच्छ। इंद्रंपूषण्वंतंगच्छ। इन्द्रंसरस्वतीवंतंगच्छ। कपालन्यस्तोद्वा सयति। सप्रवर्ग्येदधिघर्मः। तद्दधिघर्मपूर्वंप्राणदानं। प्राणदाने इन्द्रंगच्छेति। अध्वर्युर्यदिदधिघर्मस्यप्राणदानंकरोति। ततःप्रतिप्रस्था

तासदस्सोग्रेदधिघर्ममानयति। दक्षिणाश्च वक्ष्यमाणावेदिबर्हिर्दक्षि
णतएकत्र करोति। अध्वर्युर्वेद्यां दधिघर्मस्याऽसादनालंभनं कृत्वा
तत आदाय। उपविश्य सदसः पुरस्तात्सपवित्रायामग्निहोत्रहवण्यां ग्रह
णमथोक्तं। शाखापवित्रमग्निहोत्रहवण्यां कृत्वा। यावतीद्यावापृथिवी
इति दधिघर्मग्रहणं स्थालीमुखेनैवाऽवघ्रातीत्यश्रवणात्॥ यावतीद्या
वा ए० मयि गृह्णाम्यक्षितं। होतर्वदस्व यत्ते वाद्यमित्याह। निनयनं कुर्व
न्नेव। होतर्वदस्व यत्ते वाद्यं। वाद्यातेश्रातंऽहविरिरं स्फ जिष्ठन्नाह॥
श्रातंऽहविः। कुशोपग्रहं कृत्वोत्तरेणाहविर्द्धानं यजति देशो गत्वाश्रा

य्या। दधिघर्मस्य यजेति प्रेष्यति। ओ३श्रा३वय। अस्तु श्रौ३षट्। इन्द्रं दधि
घर्मस्य यज। वषट्कारेऽनुवषट्कारश्च सशेषहोमः। इदमिंद्राय। इदमग्न
ये स्विष्टकृते। अप उपस्पृश्य। हुतशेषं घर्मं र्त्विजः सयजमानाः समुपहा
वं भक्षयंतिः यथोक्तं। होत्रध्वर्युब्रह्मप्रस्तोतृप्रतिप्रस्थात्राग्नीध्रयजमानानां
सप्तानां क्रमेण सोपहवं स्वस्वशाखामंत्रेण भक्षणम्। मयि त्यदिति भक्ष
णं। मयि त्यदिंद्रियं॰ तेजसा सह। पयसो रे॰ मुत्तराधं समाम्। प्राणभक्षं वा
ऽदीक्षिताः। यजमानस्य तु प्रत्यक्षभक्ष एव। चात्वाले मार्जनं॥ पाणि
नैवाद्भिः सुमित्रिया न इति। सुमित्रिया॰ यश्चाद्वेष्टि यं द्विष्मः। इति दधिघर्मः

ततः पशुपुरोडाशयागः। वेद्यां पुरोडाशस्यासादनालंभनेकृत्वा। जुह्वामु
पस्तरणः। अवद्यन्नाह। अग्नयेपुरोडाशस्यानुब्रू३हि। यथोक्तमेवदायप्र
स्तुपस्तारक्षताभ्यंगौ। उपभृतिचावद्यनिस्विष्टकृद्वत्। नक्षताभ्यंगः। अ
तिक्रम्याश्राव्याह। अग्नयेपुरोडाशंप्रे३ष्य। इदमग्नये। हुत्वासमानीयाग्नये
प्रदाय। अग्नयेस्विष्टकृतेनुब्रू३हि। आश्राव्याह। अग्नयेस्विष्टकृतेप्रे३
ष्य। इदमग्नयेस्विष्टकृते। अपउपस्पृश्य। निधायस्रुचौ। इतरांवेदोपग्र
हणं। नसंचराभ्युक्षणं। प्राशित्रावदानं। ब्रह्मणेसमर्पणं। अपउपस्पृश्य।
इडावदानं। षडवत्तभागानांच। चतुर्द्धाकरणंमवत्येव। ब्रह्महोत्रध्व

प्र·स्तो·

॥२०५॥

युर्मैत्रावरुणाग्नीध्रयजमानानांषण्णामिडाभक्षः॥मार्जनांतेनपवित्र
प्रतिपत्तिः॥भागपरिहारः॥पशुपुरोडाशेनप्रचर्या॥पुरोडाशादिकरोत्याधिष्ण्य
निधानात्॥स्रावनीयानामासादनाद्याज्यभागवर्जंब्रह्मणप्राशित्रप्रद
नांतंप्रातःसवनवदनुवाचनादौविशेषः॥माध्यंदिनसवनस्यैंद्रापपु
रोडाशानामनुब्रूहि॥माध्यंदिनसवनस्यैंद्रापपुरोडाशान्प्रस्थितान्प्रे
ष्य॥इदमिन्द्रायैंद्रापहरिवते पूषण्वतेसरस्वतिवते च॥पुरोडाशादीनां
खंडानिपुरोडाशशकलंचवर्जयित्वाइडाग्रहणादिहोतृधिष्ण्येनिधानां
तंप्रातःसवनवत्कृत्वाद्विदेवत्यप्रचाराभावात्पाणिप्रक्षाल्योन्नीयमा

॥२०५॥

नप्रैषादि करोति। उन्नीयमानेभ्यश्चानुवाचनप्रभृत्याचमसनिधानात्।
उन्नेता प्रेष्यति। उन्नीयमानेभ्योनुब्रूश्हि। दशासून्नयति। चमसेषून्नयति
दशास्वपरेणोत्तरवेदिं निधाय शुक्रादुपस्तरणाभिघारणे। उन्नयनेंपूलभ्य
तो होतृचमसे प्रथमे। शुक्रामंथिप्रचारः प्रातःसवनवत्। प्रस्थितप्रेषविशे
षः। माध्यंदिनस्य सवनस्य निष्केवल्यस्य भागस्य शुक्रवतो मधुश्चु
तइन्द्रायसोमान्प्रस्थितान्प्रेष्य। मंथिवत इति वा मधुश्चुतस्थानेहो
तृचमसे शुक्रामंथिनोः शेषावसेकौ ते पूर्ववत्सदून्नयति॥ प्रशा
स्त्रादीनां षण्णां चमसानां प्रातःसवनवद्यागः। इदमिन्द्रायेदमग्नये स्वि

प्र॰सो॰

॥२०६॥

ष्वकृते चेलिषद्स्वपि स्यागो॥ आग्नीध्र चमसहस्तोऽध्वर्युर्होतारं प्रत्यङ्ङुपवि
श्य द्विदेवत्यभक्षाऽभावाद्धोत्रे इडासमर्पणादिमयी दमिति जपांते चेतुर्द्धा
करणवर्जं कृत्वेडामाग्नीध्रीये निदधाति। अयांतरेडाभक्षणं होतुः। स्तव
नप्रार्थना। वाग्घोता समोपह्वयतामित्युपांशूक्त्वा होतरुपमाह्वयस्वे
त्युच्चैर्ब्रूयात्। एवं सर्वत्र। चक्षुर्मेऽध्वर्युः समोपह्वयतां। अध्वर्यउपमा
ह्वयस्व। मनो मे ब्रह्मा समोपह्वयतां। ब्रह्मन्नुपमाह्वयस्व। श्रोत्रं मऽउ
द्गाता समोपह्वयतां। उद्गातरुपमाह्वयस्व। पाइमा अंतश्च चक्षुष्यापस्ते मे
होत्राशंसिनस्ते मोपह्वयंतां। होत्राशंसिन उपमाह्वयध्वं। अंगानि

॥२०६॥

मे चमसाध्वर्यवस्तोमोपकल्पयंतो। चमसाध्वर्यव उपमा कुरुध्वं। होत्रादय उपहूत इति प्रत्युपहवं दद्युरिति। होत्रचमसेन सोमभक्षणादि दक्षिणस्य हविर्द्धानस्याक्षस्य पश्चाच्चमसनिधानोक्तं प्रातःसवनवत्। तेनाराशंसा आमाहेंद्रात्। पुरोडाशशकलग्रहणाद्यभावाद्दाग्नीध्रे हविर्यज्ञर्त्विजामिडाभक्षसमस्य मार्जनभागपरिहरणानि च। यजमानस्य सवनीयहविःसशेषभक्षः। शारीरस्थित्यर्थमृत्विजामपि पक्वान्नापूपमोदकाम्रकदलीफलेक्षुरसदधिक्षीराद्यन्यच्च भक्ष्यः। अत्रापि कठसूत्रात् तल्प्य[illegible]शनं वा। इडाभक्षयित्वा। शालाद्वार्ये दाक्षिणहोमो वासःप्रबद्धं हिरण्यं हवन्याम

वधायचतुर्गृहीतमुदुत्यमिति। अग्निहोत्रहवण्यासर्वार्थसंस्कृतादाज्या
समित्पूर्वां दक्षिणतस्तूष्णीं ब्रह्मास्ते। उदुत्यंजा॰ सूर्यः स्वाहा। इदंसूर्याय।
चित्रंदेवानामितिद्वितीया। तथैवसमिद्वर्ज्जं। चित्रंदेवानामु॰ स्तस्चुषश्च
स्वाहा। इदंसूर्याय। आग्नीध्रीयेग्नेनयेति। तस्मादेवाज्याद्धिरण्यवर्ज्जंसमि
त्पूर्वंसकृद्गृहीतं। दक्षिणतस्तूष्णींब्रह्मास्ते। अग्नेनयसु॰ उक्तिंविधम
स्वाहा। इदमग्नये। अयन्नइत्यपरामश्वंचेद्दक्षंदद्याद्पुरुषंवा। निय
मेनेयमाहुतिः। अयन्नोअ॰ जूहुराणः स्वाहा। इदमग्नये। सदसिस्वासने
ब्रह्मोपविशति। वासोहिरण्यंददाति। सहिरण्योयजमानः शालांपूर्वेणति

ष्वन्नमिमंत्रयतेदक्षिणावन्ति वेदिलिष्ठतीर्दक्षिणतोरूपेणवइति। रूपेणवोरू॰चं
द्र दक्षिणा। गवां॰ शतंद्वादशंवातिक्रामतिमंथोदनतिलमाषाश्चांतराशालासदसी
दक्षिणेनाग्नीध्रंतीर्थेन। सुब्रह्मण्या चप्रेष्यतिवा। आग्नीध्रादनुगच्छंतिसुन्व
न्। प्रागनुवचनाद्याहरतः प्रभृतिप्रतिहर्त्रैदक्षिणादानांतंयजमानोंऽस
दोगच्छतिविसृष्वरिति। विसृचः पश्यव्यंतरिक्षम्। प्रसृतेयतस्वसदस्येरितिस
दस्यान्। यतस्वसदस्यैः। ब्राह्मणमध्येसाग्नीध्रागमनं। ब्राह्मणमध्यवि
सृध्यातुदक्षिणं। अथसमुदितपक्षाश्रयणेनदक्षिणादानोऽपविश्य। आ
ग्नीध्रेप्राङ्मुखोग्नेः पश्चात्। कुशाकुसुमयवजलान्यादायदक्षिणासंक

ल्पं कुर्यात्। अस्याग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य समृद्ध्यर्थं हिरण्यं शतं गावा
सोऽश्वं मंथौदनतिलमाषांश्च दक्षिणा ब्रह्मादिभ्य ऋत्विग्भ्यो यथाशास्त्रविभा
गेनाऽहं संप्रददे-इति संकल्प्य। हिरण्यमस्मै ददात्यस्मद्राताः इति। उदङ्मुखोपवि
ष्टायाग्नीध्रे। अस्मद्राता देवत्रा गच्छत प्रदातारमाविशत। अग्नीद्दक्षिणानां
तेषोविभागः स प्रतिगृह्य ताम्रू पत्नी च ददाति। मयापि दत्तेति पत्नी स
र्वत्र ब्रूयात्। पत्न्यश्चेत्सर्वा अपि ब्रूयुः। द्यौस्त्वेति स्मार्तमंत्र एवात्राध्व
र्युप्रतिप्रस्थात्रे। भिन्ना नोपजुर्वेदिनो सर्वदक्षिणाप्रतिग्रहमंत्र इति क
श्चापिमतमिति वृद्धचरणाः। अग्नये हेत्यादिका एवेत्यन्ये। आग्नेयाय

चाग्नीध्रवत्सदसः पुरस्तादुपविष्टाय।ऽउदङ्मुखाय। दानार्थं तत्समीपे गत्वा
प्राङुपविश्य। क आत्रेयं क आत्रेयमिति त्रिरुक्त्वा। क आत्रेयं क आत्रेयं क आत्रे
यं। अहमात्रेयमहमात्रेयमहमात्रेयं इत्यात्रेयः प्रत्याह। स कूच्छेषं। अहालेप
मवालेपमकौद्रेयमश्रोत्रेयमवारथ्यमगोपवनं। दक्षिणाद्रव्यव्यतिरिक्त
मन्यद्धिरण्यमात्रेयाय देयं। अस्मद्दाता॰ शात। आत्रेय हिरण्यं तुभ्यमहं सं
प्रददे। ऋत्विग्भ्यो दक्षिणा ददाति पृथक् शतानि पुरुषभेदात्प्रतिविभा
गो वा कर्मप्राधान्याद्यथारंभं द्वादश द्वादशपृष्ठेभ्यः षट् षट् द्वितीयेभ्य
श्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः। ब्रह्मोद्गातृहोतृभ्यः।

प्र०सो०

॥२०९॥

सदस्युपविष्टेभ्यउदङ्मुखेभ्यः। अस्मद्राताइत्ययंमंत्रः सर्वेभ्योदानेषुप्र
योक्तव्योदानंचप्राङ्मुखेन। अस्मद्राताः विशतेति। ब्रह्मन्दक्षिणानांतेयोवि
भागः सप्रतिगृह्यतां। उद्गातर्दक्षिणानांतेयो०। होतर्दक्षिणानांतेयो०। अ
ध्वर्युभ्यांचहविर्धानेउपविष्टाभ्यांउदङ्मुखाभ्यां। अध्वर्यूदक्षिणानां
वांयोविभागोतौप्रतिगृह्येतां। अग्नयेत्वेतिहिरण्यंप्रतिगृह्णीतोरुद्रा
यत्वेतिगांबृहस्पतयेत्वेतिवासोयमायत्वेत्यश्वं। अध्वर्युप्रतिप्रस्था
तारावेव। कोदादित्यन्यत्। तौदावेवनान्ये। इत्थंतौमंत्रवचनौ। अध्वर्युप्र
तिप्रस्थातारौरेव। प्रत्येत्य। पुनः सदसिगत्वा। प्रस्तोतर्दक्षिणानांतेयो०। प्र

॥२०९॥

शास्तर्दक्षिणानीतेयो·। ब्राह्मणाच्छंसिन्दक्षिणानीतेयो·। पोतर्दक्षिणानीतयो·।
नेष्टर्दक्षिणानीतेयो·। अच्छावाकदक्षिणानीतेयो·। उन्नेतर्दक्षिणानीतेयो·। ग्राव
स्तुर्दक्षिणानीतेयो·। सुब्रह्मण्यदक्षिणानीतेयो·। प्रस्तरेभ्यश्चान्यत्कृष्णकश्य
पयाचमानवर्जं ज्ञातये चाऽश्रोत्रियाय। नरजलं दद्याद्धिषि पुरास्य संवत्सरा
ऽहेरुदतीतिश्रुतेः। अस्य यज्ञस्य समृद्ध्यर्थं यथासंपन्नं हिरण्यं तं निष्क्र
यभूतं द्रव्यं वा ऽउपगातृभ्यः प्रासर्पकेभ्यश्च मनसाध्वर्युभ्यो देवयजनं प्रत्या
गतेभ्यो ऽन्येभ्यः प्रतिषिद्धभिन्नेभ्यो ब्राह्मणेभ्यश्च मनसोद्दिष्टविभागेना
ऽहं संप्रददे। इति संकल्प्य। सर्वेभ्यो दत्वा प्रतिहर्त्रे पश्चात् ऽउदस्मुरवाय॥

प्रतिहर्तुर्द्दक्षिणां नांतेयो०॥ इति दक्षिणादानं॥ अध्वर्युर्ऋतुपात्रेध्वासादितो गृही
तं मरुत्वतीयग्रहमादाय। इन्द्राय मरुत्वतेऽनु वाचयति। इन्द्राय मरुत्वतेऽनुब्रू
हि। अतिक्रम्याश्राव्याह। इन्द्राय मरुत्वते प्रेऽष्य। वषट्कारेऽनुवषट्कारे च
सशेषहोमेनात्र चमसानां कंपनं। इदमिन्द्राय मरुत्वते। इदमग्नये स्विष्ट
कृते। अप उपस्पृश्य। हुत्वा प्रतिप्रस्थात्रे पात्रं प्रयच्छति। भूदानमतः। ऋतु
पात्रेण मरुत्वतीयग्रहणमुपयामगृहीतोसि मरुतां त्वौजस इत्यध्वर्यु
मनुजुहोति सशास्त्रे त्वानुपूर्व्ययोगात् त्वतीयश्रुतेश्च। वशिना मरुत्वतीय
ग्रहणं मरुत्वंतमिति द्वितीयेन र्तुपात्रेण परिप्लवया शुक्रात् सूतभत्तो वा।

मरुत्वंतं वृषभं॰ कृवेमा उपयामगृहीतोसींद्राय त्वा मरुत्वते। गृह्णामि। परिमार्ज
नं। दक्षिणे तरस्था वर्ती। सादनं। एष ते योनिरिंद्राय त्वा मरुत्वते। सादयामि।
प्रतिप्रस्थातुः सकाशाद्दत्तु पात्रस्थं धारां मरुत्वतीयसशेषमादाय तस्या
ध्वर्युहोतृभ्यां सर्वभक्षं भक्षणे। निर्हृते पात्रे अध्वर्युर्मार्जालीये प्रक्षाल्य
खरे सादयति। गलस्तोत्रोऽयं महामरुत्वतीयग्रहो माध्यंदिनपवमाने
न। होताशंसति। होतुः पुरस्तात्प्रागनास्त इत्यादि। जनिष्ठा उग्र इत्येत
स्यामदामोदैवेति प्रतिगरः सकृत्। यत्र क्वचन प्रदेशो तत्स्थाने विकृ
तो। शस्त्रांते महामरुत्वतीयं ग्रहमादत्ते। प्रतिप्रस्थाता रिक्तो नर्तुपात्रे

णपरिप्लवयाभुक्तात्पूतभृतो वा तत्वती पं कुंठ मरुत्वतीपग्रहं गृह्णात्युपया
मगृहीतोसि मरुतां त्वौजस इति।उपयामगृहीतोसि मरुत्वतां त्वौजसे।गृह्णा
पि।परिमार्जनं।सादनं।एष ते योनिः।सादयामि।सादयित्वा पुनरादाया
ऽध्वर्युमनुवषट्कारेऽनुवषट्कारे च सशेषं जुहोति। अध्वर्युरालिकम्या
श्राव्याह।उत्क्षशाय ज सोमस्य।वषट्कारेऽनुवषट्कारे च सशेषहोमश्चम
सानां कंपनं।इदमिन्द्राय मरुत्वते।इदमग्नये स्विष्टकृते।अपउपस्पृश्य।
हुत्वा प्रदक्षिणेतरथावृत्ती च कृत्वा हुतशेषस्याऽध्वर्युहोतृभ्यां निःशे
षं भक्षणं।प्रतिप्रस्थाता कुंठ मरुत्वतीपशेषमनुपहूयैवैकाकी स्वयमेव

भक्षयित्वा पात्रं प्रक्षाल्य खरे सादयन्ति। चमसिनश्चानुपहूयैव स्वं स्वं च
मसं सशेषं भक्षयित्वाऽऽप्यायस्व स्व चमसाध्वर्यवे प्रयच्छन्ति॥ ते च न
राशंसस्थाने यथाक्रमेण स्थापयन्ति च मार्जालीये पात्रं प्रक्षाल्य ह
विर्द्धानाऽपरद्वारेण प्रवेश्य खरे सादनं। आनिधानात्कृत्वा। माहेन्द्रं गृह्णा
ति वैश्वदेववन्महाँ२ इन्द्र इति। वस्तुपदेशात्परिप्लवया शुक्रपात्रेण द्रोणकल
शात्स्वारब्धेवा॥ महाँ२ इन्द्रो नृवदाच॰ कर्षणि प्रा इति नू॥ उपयामगृहीतोसि महेन्द्राय त्वा
गृह्णामि॥ परिमार्जनं। प्रदक्षिणे तरथावृत्ती॥ सादनं॥ एष ते योनिर्महेन्द्राय त्वा॥ सा
दयामि॥ शुक्रं पूतभृत्यासिच्य॥ पात्रं भूमौ निदधाति॥ पश्चात्पुरोरुक्स्य॥ तृणान्यांग्र

हमुपस्पृश्य हविर्द्धानापरद्वा [illegible] रेणैव निष्क्रम्य प्रस्तो
त्रे तणे प्रपच्छन्नाहा उपावर्त्तध्वं। न तावत् स्तोत्रमिति च ब्रूयात्। प्रष्य
ति। सावसानांश्च तुरः प्रैषान्। अभिषोतारोभिषुणुत। ॐ उलूखलानु
वादयत। अग्नीदाशिरं विनय। सोमस्य वित्तात्। वलिनः शुष्काभिषवः।
अभिषवणे प्रतिप्रस्थाता नेष्टुन्नेतारः पर्युपविशंति। उन्नेतः प्रति
प्रस्थाता। अपरेण परीत्य तौ द्वौ। ब्रह्मा सभेत्रं दक्षिणत आस्ते। अभि
षवार्थानां मीषां तरेणाहरणं। पाणिप्रक्षालनार्थं लौकिकमुदकं। स्व
स्वं हिरण्यं ग्रावाणं च। संभरणीमुपयतो दशापवित्रं च। सर्वेषां पाणि

प्रक्षालनहिरण्यबंधनाज्यादानवाग्यमनानि। प्रातःसवनेउपांशुग्रहपा
त्रमध्येवाग्यपणस्थाल्यांस्थापितायाअंशुकुंडलिकालांविस्रंस्यज्जीषि
णसहमिश्रयति। ऋजीषमिश्रमंशुमभिषुण्वंतियथाकथाचानुद
कं। त्रिपर्यायान्याभिषवोपदेशात्। मानाभिमर्शनवर्जंकृतस्यात्। नि
ग्राभ्याऽसेकाभावात्त्रिधाधिमज्यमाभेरितिप्रहरणत्लणाभिध्यानकुट्ट
नानि। उत्सृजनत्लणाभिध्यानकुट्टनानि। पुनरुत्सृजनत्लणाभिध्यान
कुट्टनानि। आप्यायननिग्राभवाचने। आधवनीयेकृत्वापुनराहृत्या
ऽकृत्वावापुनस्त्रिधाकरणादिनिग्राभवाचनांतंद्विर्वारमद्रिणाचतुर्थंच

वाचनमद्भिनिधानं वा कृत्वा। आधवनीये करोति। ऋजीषरूपं सोममिति भु
ष्काभिषवः॥ ततः सवनीयपुरोडाशनिर्वापः। सवनीया अपयस्याः सौम्य
श्चरुर्वारुणश्चैककपालोधिको॥ शालाद्वार्यस्योत्तरतो दक्षिणतश्चाद्वि दि
रिति चतुरासनं। शालाद्वार्ये वाचस्पति प्रैषः। शालाद्वार्य दक्षिणेन समंत्रं ब्र
ह्मास्ते॥ यजमानवाचं यच्छेति प्रैषः॥ पात्रासादनं॥ शूर्पाग्निहोत्रहवणि। एकादशकपा
लानि कर्परमेककपालं पाणिसंमितं च॥ शम्याकृष्णाजिनं॥ उलूखलं मुसलं॥ दृषदुप
लं॥ शाखोपवेषउपसर्जनीपात्रं च॥ त्रिबिलापात्री पुरोडाशपात्री च॥ [illegible]तावदानप
स्रेत्री ह्योषधं यवपिष्टानि यवास्तं दुत्तां श्च॥ वारुणार्थं यवोषधमेव व्रीहिमयपुरोडाश

पक्षेपि ॥ चरुस्थाल्लीमेक्षणाकुरं नरधिषड। वत्तचाल्लानाशिरस्थांडुं दुमुपकल्पनं ॥ मंथ
रंऽस्य च ॥ स्फ्योपहितपात्रीकरणादि ॥ ग्रहले ॥ इंद्रायजु॰। इन्द्रायहरिवतेजु॰। इंद्रायपुषख
तेजुष्टं॰। सोमायजु॰। व्रीहीणां। वरुणायजु॰। यवानां। प्रणीताभ्यः प्रोक्षणीः
संस्कृत्य। प्रोक्षणे। इन्द्रायत्वाजु॰। इन्द्रायहरिवतेत्वाजु॰। इन्द्रायपूषण्व
तेत्वाजु॰। सोमायत्वाजु। वरुणायत्वाजु॰। पात्राणिप्रोक्ष्यप्रोक्षणीनाऽग्नि
शेषकरणं। कृष्णाजिनादानादिकुकुटाहननवर्जंतुषनिरसनांतंकृ
त्वाचर्चकः। इदमिन्द्रस्यवरुणस्यचा। इदमिन्द्रस्यहरिवतइन्द्रस्यपूषण्व
तश्च। इन्द्रवरुणयोर्धान्यमसि धिनुहिदेवान्। विस्पूर्हिलनदृषद्यावापः। अद्भ

पिष्टेपकादशकपालानांकर्परैककपालपोऽश्वोपधानंस्वस्थानेचरुस्थान
कल्पनंचालप्यस्वसैककपालस्याभ्यूहनंनदोषः।चरुधर्माउक्ताः।चरौव्री
हिषुमुसलयोजनेदेवायेत्यूहः।संयवनांतेचर्चकः।इदमिन्द्रस्याइदंवरुणस्य।
अनुक्तंपात्रसंमार्गांतंप्रातस्सवनवत्॥।अत्रसंमार्जनप्रतिपत्तिः।व्रीहिमय
पुरोडाशापक्षलुष्कृत्याजिनादानादिकुकुर्याहननवर्जंइन्द्रसोमयोस्तुष
विप्रमोकांतंकृत्वातुषाःस्थाप्याः।तच्चमुसलावधानेदेवाभ्यामित्यूहः।
ततोयवानामुलूखलआवापवाग्विसर्गयथाप्रकृतिमुसलयोजनादि
नानाविजधर्मेणतंत्रेणतुषनिरसनांतंकृत्वायवेषुचर्चकः।इदमिंद्र

स्यहरिवतरइंद्रस्यपूषखतस्त्र ॥ इदंवरुणस्य ॥ इतरन्द्रसोमयोस्तंडुलानां वारुणस्यचयवानाम

संकरेणपात्र्यामावापः ॥ देवोवइतिमंत्रेणतंत्रेणाभिमंत्रणं ॥ ततरन्द्रसोमयोः फलीकरणंकण

निधानंच ॥ ततोवारुणस्यफलीकरणंकणनिधानंच ॥ कणांते व्रीहिषुचर्चकः ॥ इद्रमिंद्रस्य ॥

इदंसोमस्य ॥ ततः कृष्णाजिनादानाद्यैंद्रस्यपेषणं प्रोहणांतंदेवमित्यूहः ॥ ततोधान्यमसि

धिनुहि देवमित्यूहितेन दृषदि वारुणस्ययवावापः ॥ अर्द्धपेषणं ॥ ततः कपालोपधानं ॥ ततो

ऽर्द्धपिष्टपेषणंप्रोहणांतं। ततो व्रीहिपिष्टानांतंदुलानां चसहैव चक्षुषे त्वेतीक्षणं।

ततोयवपिष्टानां चक्षुषेत्वेतीक्षणं। ततः सपवित्रपात्र्यामैंद्रपिष्टावापः। ततः सप

वित्र चरुस्थाल्यांतंडुलावापः। पुनः सपवित्रपात्र्यैकदेशेवारुणपिष्टावापः। यथानु

क्रमेण सर्वत्रोपसर्जनीनां प्रतिग्रहः॥ सयवनं। यथानुक्रमेणाधिश्रयणादियवपक्षेण समानमिति सवनीयनिर्वापः। ततोऽग्नीदाग्नीध्रेऽग्नेः पश्चान्मथदंडेनाऽशिरं दधि मंथति। ततः पव्यास्तवनादि। प्रस्तोत्राए षोत्तमे सुक्ते होतुः पुरस्तात्प्राङ्गस्तत इत्यादि। शस्त्रांते माहेंद्रमादद्याति क्रम्यां श्राव्याह। उत्तमश्चा यजसोमस्य। वषट्कारेऽनुवषट्कारे च सशेषहोमश्च मसानां कंपनं। इदं माहेंद्राय। इदमग्नये स्विष्टकृते। अपकृपस्य स्थाकुत्वा प्रदक्षिणेतरथावर्त्ती चरूसाकुतशेषस्याऽध्वर्युहोतृभ्यां निःशेषं भक्षणं। चमसिनश्चानुपहूयेव स्वं स्वं चमसं सर्वं भक्षं भक्षयंति। सर्वभक्षाश्च मसाः। मार्जालीये पात्रं प्रक्षाल्योत्तरवेदिमपरेण प्रशास्त्र चमसपूर्वमुदकं संस्थापयंति। आपात्रप्रक्षालनात्कृत्वा। उत्तमं वि

२ प्रक्षाल्य हविर्द्धानाऽपरद्वारेणैव प्रविश्य खरे सादयति। चमसाध्वर्यवश्च चमसान्मार्जालीये २

॥२१५॥

ग्भ्णातिपूर्ववदिंद्रायत्वेतिसर्वेभ्यः।प्रातःसवनवद्ग्रहणादिपात्रप्रक्षालनांतास्त्वपउ
त्स्यविग्रहाः।तत्रैंद्रायत्वादेवाव्यंपज्ञस्यायुषेगृह्णामीतित्रिष्वपिग्रहणेमंत्रः।इद
मितित्यागः।प्रागच्छावाकविग्रहान्निशेषेणवसतीवरीश्चासिंचति।इदं त्वत्तीय·
सवनंकवीनाम्तेनपेयमसमैरपंतः।तेसोधन्वनाःस्वरानशानाःस्विष्टिनो
भिवसीयोनपंतु।एकधनशेषच।प्रत्येकं मंत्रः।इदं त्वत्तीयं·सवनं·वसीयो
नपंतु।३।इतिविशेषोन्य समानं।प्रस्तुतांतेनवति।यदिलेसर्वैःप्रशास्तःप्रस्
हीतिब्रूयात्।प्रशास्तःप्रसुहि।सर्पतेतिमैत्रावरुणःप्रत्याह।प्रस्तुतानां
सर्पणं।सर्वेऋत्विजःसदसोनिष्क्रम्यमूत्रपुरीषाद्यावश्यककार्यंतीर्थेन

वहिर्गत्सानत्पृत्वा चवैयां पुनस्तेनैव पथा प्रत्यागच्छंति। सवनांतभूतं निष्क्रमणं रू-
पं सर्पणमत्रैव स्यकाल एव भवति। नोपस्थानादि। सवनादिभूतमुपस्थानरूपमेत
त्सर्पणमित्यत्रोक्तं। आदित्यग्रहहोमानंतरं तृतीयसवनादिभूतलोकद्वारीयसामनो
नरमंत्रसर्पणमित्यत्रभविष्यतीति निष्कर्षो विवेकः। यच्चात्र चंद्रप्रभृतिभि
र्द्वित्र्यादिभिः पद्धतिकारैरुक्तं तदुक्तं सकलभाष्यपद्धतिविरुद्धं शाखांतरवि
रुद्धं याज्ञिकसंप्रदायविरुद्धं चेत्युपेक्ष्यमिति संक्षिप्तेमाध्यंदिनसवनम्।
अथ तृतीयसवनम्। अथाह सगच्छे स्थितएव माध्यंदिने सवने पुरा तृती
यसवनादेर्हि यजमानेति श्रुतेः। इत ऊर्ध्वं तृतीयसवनधर्माः स्वरादयः।

एहि यजमाने स्वाहा। एहि यजमान। हविर्द्धानं प्रविशेत्यध्वर्युर्यजमानः प्रति
प्रस्थात्राग्नीदुन्नेतारः। पूर्वद्वारेण। पत्नी चापरेण। पत्न्यश्चैतास्सर्वा अपि प्रवि
शन्ति। बहिर्वेदिस्थासने ब्रह्मोपविशति। अपिहितद्वार आदित्यपात्रमादाय
सं॰ सर्वांश्चोपरि पूतभृतस्तत आदित्यग्रहं गृह्णाति सं॰ सर्वेभ्यः कदाच
नेति। आदित्यस्थालीमुखेनैव सव्ये पात्रस्थितं दक्षिणकरेण सशेषं। कदा
चन स्तरीः॰ देवस्य पव्यतः आदित्येभ्यस्त्वा। गृह्णामि। अपगृह्य पुनः कदा
चनेति। कदाचन प्रयुच्छ॰ दिव्यादित्येभ्यस्त्वा। गृह्णामि। स्थालीमन्यस्मै प्र
दाया दध्याश्रीणात्येनं पात्रमेलेमध्येवा यज्ञो देवानामिति। कुशाक्त

द्याय। यज्ञो देवानाप्र॰ सदादित्येभ्यस्त्वा। श्रीणामि। उपा॰ शुसवनेन मिश्र
यति विवस्वन्नादित्येति। विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्व। उ
पा॰ शुसवनमुन्नेत्रे प्रयच्छत्यासृजग्रावाण इति चाह। प्रदानसमकाल ए
वा आसृज ग्रावाणः। आधवनीये चमसे वा सोमवति ग्रावाणमवधाय स्था
ने निदधाति। उन्नेतेव। परिमार्जनं। नसादनं। अपावृतद्वारे निष्क्राम
तो गृहमपिधाय पाणिना स्थाल्या वा। निष्क्रमणे द्वितीयः प्रतिप्रस्थाता।
पत्नीनत्रैवास्ते पूतभृदवेक्षणाय। पत्न्यश्चेत्सर्वा अप्युपविशंति। अन्वार
भ्य आदित्येभ्योनु ब्रूहीति। आदित्येभ्यो नु ब्रू३हि। अथवा प्रियेभ्यः प्रि

पधामभ्यः प्रियव्रतेभ्यो महस्वसरस्यपतिभ्य उरोरंतरिक्षस्याध्यक्षेभ्य आ
दित्येभ्योनुब्रू३हि। होमांतोऽन्वारंभः। अग्निक्रम्याश्राव्याह। प्रेषानुवाचनयो
रन्यतरस्मिन्नाह॥ प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो महस्वसरस्यपतिभ्य
उरोरंतरिक्षस्याध्यक्षेभ्य आदित्येभ्यः प्रे३ष्य। इति चानुवाचनपक्षे आदित्ये
भ्यः प्रे३ष्येत्येतावदेव प्रेषः। वषट्कृते सशेषहोमो नानुवषट्कारः। इदमादि
त्येभ्यः। हुत्वा प्रतिप्रस्थात्रे प्रयच्छति शेषं। आहवनीयस्य पश्चादुदङ्मुखो
पविष्टस्य यजमानस्य लोकद्वारीयसामगानं सर्वार्थसिद्धकृतादाज्याद्धोम
श्च। अत्र सर्पणमादित्यग्रहस्य प्राकृतीयसवनश्रुतेः। सयजमानाः स

वैकृत्विजः सवनादिभूतमेतत्सर्पणमित्यत्रोक्तं सर्पणं कुर्वंति। प्रतिप्रस्था

ता१ तापि चमसाध्वर्यवे स्वहस्तस्थौ द्रोणौ समर्प्य सर्पणं करोति। ततः प्रतिह

र्ता पूतभृतं संमार्ष्टि। उद्गातारः पवित्रं च वितन्वंति। ब्रह्मा च समंत्रं दक्षि

णत आस्ते। आग्रयणमादायासिंचति पवित्रेऽधि पूतभृतं। स्थालीस्थं

पात्रांतरे कृत्वा नेष्टैव पवित्रोपर्यासिंचति। प्रतिप्रस्थाता च सं स्रवौ

हस्ताभ्यां। आधवनीयादुन्नेतोदंचनेन चमसेन वा। तत आग्रयणं गृ

ह्णाति। पूर्ववत्वात्। तेन च तत्स्थाधाराणामाग्रयणं गृह्णातीति श्रुतेः। अत्र प्र

तिप्रस्थात्रादीनां वाग्विसर्गः। उत्थ्यं चोत्तरेष्वेकया। उन्नेतृकर्तृकया

धारया ॥ पूतभृत्स्थालिभिरमासिंचति ॥ आशीर्मऊर्जमुतसुप्रजास्त्वमिषंदधालुद्रवि

णं८॰ सुवर्चसं ॥ संजयन्क्षेत्राणि सहसाहमिंद्र कृखानान्यानधारांत्सपत्नान् ॥ श्वदस्मै

नरस्त्येनमवेक्षते पत्नी ॥ श्वदस्मैनरो॰ एषतेगृहे ॥ पत्न्यवेक्षितराज्ञिरन्वारब्धासत्ये

कैवावेक्षते ॥ ततः स्वस्थाने गच्छंति ॥ पाणिप्रक्षालनं ॥ समन्वारब्धनिष्क्रमणादिकरो

ति माध्यंदिनवत् ॥ स्तोत्रसमाप्तिं याचत् ॥ उपस्थिताहूदंचोगच्छति ॥ पूतभृतिपावन

८॰ शुक्रा नावात् ॥ स्तूयमाने कुंभऋजीषस्यावधानं ॥ आनेवेस्तूयमानउन्नेताध्वर्यनी

यस्थं सर्वं सोमं पवित्रमतदीयपूतभृत्यासिच्यऋजीषं विवसतीवरीणां कुंभे प्रक्षिपती

त्यत्र विशेषः ॥ पश्चोसंवदस्वेत्युपचयस्थाने ॥ प्रातःसवनप्रभृत्यासंयाराष्ठूतेः ॥

स्तोत्रांते प्रेष्यति। पूर्ववत्। अग्नीदग्नीन्वीहर बर्हिस्तृणीहि पुरोडाशाँ३ऽअ
लंकुरु। प्रतिप्रस्थातः पशौ संवदस्व। यथान्युप्तं धिष्ण्येष्वाग्नीध्रादंगा
रान्निवपति। अनुपृष्ठ्यां बर्हिस्तृणाति। पुरोडाशविभस्मीकरणं। त्रि
बिलापात्री पुरोडाशपात्र्योः स्थापनादि। प्राणदाने। इंद्रं गच्छ। इंद्रं हरिवं
तं गच्छ। इंद्रं पूषण्वंतं गच्छ। इंद्रं सरस्वतिवंतं गच्छ। सोमं गच्छ। वरुणं ग
च्छ। कपालान्यस्कोद्वासयति। धिष्ण्यस्थानग्नीत्सर्वे संस्क्षेयुः। शमि
त्रनुशासनप्रभृतीडांतं कृत्वा। प्रतिप्रस्थातादिती यं शमित्रेनुशासन
माह। पत्नी पश्चाच्छृतः हविः शमिता३ऽरिति श्रृतमित्येव ब्रूतान्नश्रृतं

भगवो नमत ऽ॰ हि। त्रिः प्रच्युते हृदयं प्रवृह्योत्तमं करोति। शमिता। शू
लं चाभूमौ। करोति प्रतिप्रस्थाता। शमिता वा। प्रतिप्रस्थातैव जुह्वापृष
दाज्यस्यादाय। अनुयाजार्थं पंच गृहीत शेषाद्धानस्प स्याज्यात्। स्रुवमा
ज्यस्थालीं वेदं चादाय। उपनिष्क्रम्य पृच्छति। भरत ऽ॰ हविः शमिता ३
इति त्रिरक्तोऽभि मं। भरत ऽ॰ हविः शमिता ३। शमिता। भरतमिति प्रसाह।
भरतम्। प्रोक्ते तद्देवानां भिस्याहापा ७ भ्यु। तद्देवानाम्। एवं द्विरप
रमभिक्रामन्नेव। अध्वर्युर्हृदयाभिघारणादि पाश्विडा मार्जनां त
मग्नीषोमीय पशुवत्करोति। तत्र प्राणदाने। अग्निं गछ। अनुवाच

ने अग्नयेध्वागस्यहविषोनुब्रू३हि। प्रेषे अग्नयेध्वागस्यहविः प्रस्थि
तंप्रे३ष्य। स्वांगे। इदमग्नये। नसंचराभ्युक्षणं। भागावदानानांनि
यमेनसमर्प्पणंयजमानस्येडोपहूतायामेव। क्लोमंब्रह्मणे। अध्वर्य्वी
होत्रे। पुरीतलमध्वर्यवे। वनिष्ठुमग्नीध्रे। प्लीहंयजमानायाध्वर्युर्दद्या
ति। इडामार्जनांतेयत्नेनपवित्ररक्षणंनप्रतिपत्तिरितिविशेषोऽन्य
त्समानं। पुरोडाशादिचेडाभक्षात्। सवनीयामासादनाद्याज्यभा
गवर्जंसंचराभ्युक्षणाधिकंब्रह्मणेप्राशित्रप्रदानांतंमाध्यंदिनवदनु
याचनादौविशेषः। तृतीयस्यसवनस्यैंद्रायपुरोडाशानामनुब्रू३

हि।तृतीयस्यसवनस्यैंद्राग्नपुरोडाशान्प्रस्थितान्प्रेष्य।इदमिंद्रायेंद्रा
यहरिवते पूषण्वते सरस्वतिवते च।इडाग्रहणादि होतृधिष्ण्ये निधानां
तं माध्यंदिनवत्कृत्वा पाणिप्रक्षाल्योन्नीयमानप्रैषादि करोति।उन्ने
तः प्रेष्यति।उन्नीयमानेभ्योनुब्रूहि।चमसेषुन्नयति दशस्वपरेणो
त्तरवेदिं निधाय भक्षाभावादुपस्तरणाभिघारणे न स्तः पूतभृतः
सकृत्सकृद्धोतृचमसे प्रथमं।मतांलरतस्तलद्योपस्तारोभिघाराव
पीत्ये ये त्रिःकृत्वोपि वा।भक्षामंत्रिनाभावाच्चमसैरेव।अध्वर्युर्हो
तृचमसं गृहीत्वा।चमसाध्वर्यवश्चेतरांश्चमसान्गृहीत्वेति च।यजंति

स्थाने तिष्ठ स्वध्वर्युः । आश्राव्याह । तृतीयस्य सवनस्य ऋभुमतो विभुमतो
वाजवतो बृहस्पतिमतो विश्वदेव्यावतस्तीव्रां २ऽ आशीर्वत इन्द्राय सो
मान्प्रस्थितान्प्रे३ष्य । वषट्कृते तूष्णीमेव सशेषहोमोऽनुवषट्कृते
पि । चमसाध्वर्यूणां च सशेषहोमो ब्रह्मादित्रयाणां द्विः । षष्ठ्यां सकृत् ।
इदमिंद्रायेदमग्नये स्विष्टकृत इति त्यागो । अप उपस्पृश्य । सावसा ५ प्रेष्यति च
नाः षट्प्रेषान् । आशीर्वत इति श्रुतेः स्थाने । प्रैतु होतुश्चमसः । प्रब्र
ह्मणः । प्रोद्गातृणां । प्रयजमानस्य । प्रयंतु सदस्यानां । होत्राणां चमसा
ध्वर्यव उपावर्तध्वमाशीर्वतोऽभ्युन्नयध्वं । षडुन्नयंति । चमसाध्वर्य

वः स्वं स्वं चमसं पूतभृतस्त्रिः कृत्वडुन्नयंति। प्रशास्त्रादीनां षण्णां चमसानां
माध्यंदिनवद्यागः। अछावाकचमसवर्जं पंचानां त्यागास्तु प्रातःसवन
वत्। अछावाकचमसे इदमिंद्राविष्णुभ्यामिति त्यागः। आग्नीध्रच
मसहस्तोऽध्वर्युर्होतारं प्रत्यङ्.पविश्य होत्रे इडासमर्पणादि मयि द
मिति जपांतं चतुर्द्धाकरणवर्जं कृत्वडामाग्नीध्रीये निदधाति। अवां
तरेडाभक्षणं होतुः। सवनप्रार्थना। प्राणो मे होता स मोपव्हयतामि
त्युपांशु स्वाहोतरूपमाव्हयस्वेत्युच्चैर्ब्रूयात्। एवं सर्वत्र। अपानो मे
ऽध्वर्युः स मोपव्हयतां। अध्वर्यु उपमाव्हयस्व। व्यानो मे ब्रह्मा स मो

पक्लृपतो। ब्रह्मन्नुपमा क्लृपस्व। समानो मउद्गाता समोपक्लृपतो। उद्गात
रुपमा क्लृपस्व। याइमा अंतः पुरुष आपस्ते मे होत्राशंसिनस्ते मोप
क्लृपंतो। होत्राशंसिन उपमा क्लृपध्वं। लोमानि मे चमसाध्वर्यवस्ते
मोपक्लृपंतो। चमसाध्वर्यव उपमा क्लृपध्वं। होत्रा दयउपहूत इति
प्रत्येकंपह्वयेरन्स्फुरिति। होतृचमसे प्रतिप्रस्थातृवर्जं सोमभक्षणादि
दक्षिणस्य हविर्धानस्याक्षस्य पश्चाच्चमसनिधानं तेमाध्यंदिनवत्। तेना
राशंस सा आमहावैश्वदेवात्। ततपिंडदानं। प्रागिडाभक्षाद्धविर्धाने पश्चा
स्यं चमसेषूपास्यति पुरोडाशमात्रा॥ अनुदकाः पिंडपितृयज्ञवद्धानप्रभ

तिप्रागवघ्राणाय यजमानपितृभ्यो वा तस्य फलाधिकारात्॥ अपसव्यं। नी

विबंधनं। दक्षिणाभिमुखः सव्यजान्वाच्यस्य च मसस्य पश्चिमे भूमावे

वपिंडदानं कुशे। अद्यसगोत्र यजमानः पितः अदः शर्मन् एतत्ते। अन्नं

स्वधा। अदः सगोत्र यजमान पितामह अदः शर्मन् एतत्ते। अन्नं स्वधा॥

अदः सगोत्र यजमान प्रपितामह अदः शर्मन् एतत्ते। अन्नं स्वधा। इदंपि

त्रे पितामहाय प्रपितामहाय चेति यथानुक्रमण प्राचीनावीतिना यज

मानेसागाः कर्त्तव्याः। अत्र पितरइत्यस्य स्त्रा॥ अत्र पितरो मा॰ वृषायध्वं।

उदङास्त्त आलमनात्॥ आवृत्सामीमदंतेति। अमीमदंत पि॰ वृषायिष

ता । नीविं विस्रस्य । नमो व इत्यंजलिं करोति । नमो वः पितरो रसाय १ न
मो वः पितरः शोषाय २ नमो वः पितरो जीवाय ३ नमो वः पितरः स्वधा
यै ४ नमो वः पितरो घोराय ५ नमो वः पितरो मन्यवे नमो वः पित
रः पितरो नमो वः ६ गृहान्न इति जपति । गृहान्नः पितरो दत्त सतो वः
पितरो देष्म । एतद्व इत्युपास्यति सूत्राणि प्रतिपिंडं । एतद्वः पितरो वासः ।
इडायां प्रस्तवधाने पिंडानां । अध्वर्युप्रतिप्रस्थात्रुन्नेतारो नेष्टुश्चमसस
मीपे तत्सच्छिद्रे पिन्डान्दधुः होतृचमसे ग्रावस्तुतः । उद्गातृचमसे प्र
स्तोतृ प्रतिहर्तृ सुब्रह्मण्याश्च । अत्र ऋग्वेदिनो ये भ्यः पितृभ्य इहा अन्ना

नात्स्यशास्त्रधर्मेणस्वपितृभ्योदानं।यजुषांतूक्तं।स्वसूत्रैःविशेषाह्मा
मगानामपिस्वशास्त्रधर्मेणयजमानपितृभ्यएवेतिकश्चित्।पुत्रं चैत
त्।जीवपितृकोयजमानश्चेदृग्वदिभिन्नत्विजांयजमानस्यचपिंडदानं
नभवत्येवानजीवंतमतिदद्यादितिश्रुतेरितिस्वसूत्रानुरूपं।यद्वा।ये
भ्यःपितातेभ्यःपुत्रोदद्यात्।यदिद[illegible]द्याद्येभ्यएवपितादद्यात्तेभ्योद
द्यादितिकठमानवसूत्राभ्यांसौमिकेमखेइतिस्मृत्यंतरप्रतिप्रसवा
च्चमृतपितृकेपियजमानजीवपितृकाणामृत्विजांपिंडदानंभवति।
तत्रनीविबंधस्तव्यजानुनिपातवर्जं।स्मृत्यंतरेतयोःप्रतिषेधात्।

तत्रयजमानपितुःपितःपितुःपितामहपितुःप्रपितामहइतिप्रयोगः।
यजमानस्यतस्मिन्पितुःपितइत्यादि।एवंहौत्रकाणामपिज्ञेयं।यत्तुकेचि
द्धौत्रकाजीवपि त्रकानदद्युरित्याहुस्तत्कात्यायनच्छलश्रुत्यपिप्राये
णबोध्यम्।इतिपिंडदानं।आग्नीध्रेहविर्यज्ञर्त्विजामिडाभक्षस्तमस्य
मार्जनपवित्रप्रतिपत्तिभागपरिहरणानि च।यजमानस्यसवनीय
हविःशेषभक्षः।ऋत्विजामपिप्राग्वत्।अत्रापिकठसूत्रात्सपत्न्यश
नंवाभक्षयित्वेडां।अध्वर्योःपाणिप्रक्षालनं।उपांश्वंतर्यामपात्रयो
रन्यतरेणसावित्रग्रहणंवाममद्येति।सावित्रपात्रीवलहारियोजनोप

क्षीणानाग्रयणात्॥ वाममद्य सवि॰ तोसि सावित्रो॰ देवाय त्वा सवित्रे। गृह्णा
मि। परिमार्जनं। न सादनं। सावित्रं तु ग्रह प्रतिषेधाद्ध्वानिष्क्रम्य। देवाय सावि
त्रेनुवाचयति। देवाय सवित्रेनुब्रूहि। अतिक्रम्याश्राव्याह। देवाय स
वित्रे प्रेष्य। वषट्कृते सर्वहोमो नानुवषट्कारः। इदं देवाय सवित्रे। अभक्षि
तेन महावैश्वदेवग्रहणमुपयाम गृहीलोसि सुशर्मासीति। येन सावित्र
हुतस्तेनैव पात्रेण। तृतीयसवने वैश्वदेवं पूर्लभतएव। उपयामगृही
लोसि सुश॰ स्वादेवेभ्यः। गृह्णामि। परिमार्जनं। प्रदक्षिणतरथाव्रती॥
सादनं। एषतेयोनिर्विश्वेभ्यस्स्वादेवेभ्यः। सादयामि। गतस्तोत्रोपंमहा

वैश्वदेवग्रह उआभयपवमानेन। होताशंसति। होतुः पुरस्तात्प्राङासीत इत्यादि। एकयाचदशभिश्चेति शस्यमाने द्विदेवत्यानि प्रतिप्रस्थाता प्रक्षाल्य स्वखरे निदधाति। प्रपा वा यज्ञैरित्येतासु मन्द्रामो देवेति त्रिः प्रतिगरः। पत्नीकर्चनप्रदेशो अव्यवहितेनैव। शस्त्रांते महा वैश्वदेवं ग्रहमादायाति क्रम्याश्राव्याह। उक्थशा यजसोमस्य। वषट्कारेऽनुवषट्कारे च सशाषहोमश्च मसानां कंपनं। इदं विश्वेभ्यो देवेभ्यः। इदमग्नयेस्विष्टकृते। अप उपस्पृश्य। हुत्वा प्रदक्षिणोत्तरथा वृत्ती च कृत्वा हुतशेषस्याऽध्वर्युहोतृभ्यां निःशेषभक्षणं। चमसिनश्चानुपहूयैव सं

स्वं चमसं सर्वभक्षं भक्षयंति। सर्वभक्षाश्चमसाः। मार्जालीये पात्रं प्रक्षा
ल्य हविर्द्धानस्य पूर्वद्वारेण प्रविश्य स्वेरसादयति। चमसाध्वर्यवश्च च
मसान्मार्जालीये प्रक्षाल्योत्तरवेदिमपरेण होतृचमसपूर्वमुदक्संस्था
न्स्थापयंति। आपात्रप्रक्षालनात्कृत्वा। सौम्येन चरति। वेधा सौम्यं चरो
रासादनालंभने कृत्वा। आज्येनोभयतः परियजत्यन्यतरतो वा घृत
स्य यजेत्याह घृतशब्द उपांशुश्चादेवतापदं यजेति चोच्चैः। आज्य
यागेऽनुवाचनाभावश्चरोरपि। ध्रुवामाप्याययंस्तस्याश्चतुर्ग
हीतं पंचावत्तिनां पंचगृहीत्वातिक्रम्याश्राव्याह। उच्चैः। अग्नि।

उपांशु। घृतस्य। उच्चैः। यजा। इदमग्नये। सौम्यस्य यजेति सौम्येन चरुना
यावदुक्तं। सौम्यस्य पुनर्ग्रहणात्। स आज्यस्योपस्तीर्य द्विश्चरोर
वद्यत्यथोपरिष्टादाज्यस्याभिघारयति। पंचावत्तिनामप्येवं। अति
क्रम्याश्राव्याह। सोमं सौम्यस्य यजा। इदं सोमाय। पुनरुपरिष्टादाज्य
याग। उच्चैः। विष्णुं। उपांशु। घृतस्य। उच्चैः। यजा। इदं विष्णवे। इत्युभ
यत आज्ययागपक्षः। अन्यतरतः पक्षो। उच्चैः। अग्नाविष्णू। उपांशु।
